॥ श्रीगणेशाय नमः ॥ चार्वाकेण धूमज्ञानोत्तरं वह्निविषये प्रामाण्यं साधनीयं न तु गत्वा मानाधिकरण्येन सिद्धिसाधनप्रसंगात्। एवं च नैयायि-
कैः स्वपराजयार्थं तत्प्रामाण्याधिकरण्येनैव प्रामाण्यसाधनेऽपि अवच्छेदकावच्छेदेन प्रामाण्यानुमितिसंभवात् उभयोरप्येकमेव धूमज्ञानं प-
क्षः। तत्र नैयायिकानां प्रमितिजनकतावच्छेदकरूपवत्त्वं हेतुः न च व्याप्तिनिश्चयत्वमेव संभवति तस्यासिद्धेर्बौद्धैः चार्वाकैर्न ॥ सर्वमिदमिति ॥ अ-
नुमानं धूमज्ञानं युक्तिः ॥ व्याप्तिनिश्चयत्वरूपहेतुः। निश्चायकाभावादिति ॥ सामग्र्याः दुर्वचत्वादिति भावः ॥ एवं च व्याप्तिनिश्चयत्वे-
पोऽप्यनुमानं हि तथाप्यनुमाने व्याप्तिकोटेः हेत्वप्रसिद्धिरिति भावः। केचित्तु नन्वच्छेदकरूपमन्तरेण प्रमाकरणत्वसंभवः ॥ व्याप्ति-
निश्चयत्वमप्रसिद्धं। अन्यस्यानतिप्रसक्तं दुर्व[redacted]चं ॥ तथा चानुमानप्रामाण्यं दुरुपपादं। प्रत्यक्षादिप्रामाण्यं त्वन्यावश्यं त्वतो
ऽस्माभिः स्वीकार्यं अनभ्यासदशापन्नज्ञाने दोषादिवशात्तादृशाय हेतुत्वमाह। व्याप्तीति। प्रकृतमवतारयन्ति ॥ केचित्तु व्याप्तिस्वरूपके
विशेषपरामर्शस्वरूपनिर्वाहकत्वेन व्याप्तिविशिष्टस्यादिलक्षणोपोद्घातसंगतिः। अनुमितिहेतुत्वज्ञानं इति प्रकृतमेवोपपन्नमथैव ल्लो-
भावः। न च यां काचिदनुमितिं प्रति निरूपणलक्षणोऽव्याप्तिस्वरूपस्यापदर्शनं च। मौनं तदवतारयति पाच्यं ॥ मणिकार इति कौ च
व्याप्तिस्वरूपे मानिरूपितार्थसंगत्यपेक्षणादित्याहुः ॥ एवं सति पक्षधर्मता विशेषणतापन्नहेतुत्वे अनुमितिजनकत्वात् विषयत्व

पव्याप्तिपदार्थैकदेशत्वेन तत्प्रसंगेन यथाश्रुतमूलार्थान्वयानुपपत्तिः॥ प्रामाण्यनिरूपणाव्यवहितोत्तरनिरूपणीयोपायिकसंगत्यभाव
श्चेति समारब्धेत्यादिकमुक्तं। तथा चानुमानप्रामाण्ये व्युत्पादनसंगत्या व्याप्तिस्वरूपनिरूपणमितिभावः। एतेनानुमितिहेतुत्वानन्त
निमूलार्थो विस्तारितः। तथा हि अनुमितिः। अनुमाने प्रामाण्यव्यवस्थितिः। तादर्थ्यात्। तज्जनकत्वादित्यप्रयोगः। परीक्षापदार्थभूतः। तत्र
हेतुः। प्रयोजकत्वेन जनकजनकत्वात् करणव्यवस्था निरूपणविषयत्वमित्यर्थः॥ तथा च निरूपणपरीक्षाजनकीभूतोपायनिरूपणजन
कनिरूपणविषयत्वमित्यर्थः। केचित्तु। हेतुप्रयोजनकपरत्वं। तथा च निरूप्यपरीक्षाजनकीभूतोपायनिरूपणे इत्येवार्थः। एवं चोपायनि
रूपणे एवोपोद्घातरूपसंगतिः स्यात् व्याप्तिस्वरूपनिरूपणेन तु नप्रामाण्यसंगत्यपेक्षा किंतु पायप्रतिपादनार्थतया तत्सार्थक्य
मात्रं। अत्र त्वेतदौपायिकनिरूपणकत्वार्थिकासतमी तथा च स्वरूपनिरूपणपदं कोपायनिरूपणएवोपोद्घातत्वात्। ननु स
मारब्धेत्यादिनिरासनमित्यन्तं दीधितिग्रन्थस्य विशेषणं किमर्थं व्याप्तिस्वरूपनिरूपणमारभ्यत इत्येतावन्मात्रस्यैव सम्यक्त्वा
दित्यत आह। अनुमानेति। प्रकृतं यदनुमानप्रामाण्यं हेत्वसिद्धिनिरासस्य तत्साधकस्वरूपप्रकल्पनोपपादकत्वमुपायस्येत्य
र्थः। तथा चानुमानप्रामाण्यसिद्ध्युपयोगिपरामर्शस्वरूपनिर्वाहकत्वेनेति तदुपोद्घातः कुतो न दर्शित इति वाच्यं॥ तुपायामिथा

न प्रतीक्षावाः निर्विजिज्ञापनेः। इदानीं। व्याप्तिस्वरूपनिरूपणा आकूत उचितत्वादिति॥ उपोद्घातसंगत्या नादेयाप्तिसास्या संभवात्॥
प्रतीक्षां। उपायनिरूपणस्य प्रारब्धप्रामाण्यनिरूपणाव्यवहितोत्तरत्वं। स्वागं नन्वाथम्ये व्याप्तिस्वरूपनिरूपणस्य उपायनिरू
पणाधिकरणक्षणवृत्तिध्वंसप्रतियोगित्वे अप्रामाण्यसाधर्म्यैणेत्याद्रियं थेन अनुमानप्रामाण्यव्यवस्थापकेन वादिनिरासात्॥
व्याप्तिस्वरूपनिरूपणेऽप्रथमिति। व्यापारांशनिराकरणार्थं समारब्धेति विशेषणमित्याह। व्याप्तीति। अनिष्पन्नत्वादिति। निष्पन्नत्वं
अतीतकृतिविषयत्वं। अतीतत्वं वर्तमानध्वंसप्रतियोगित्वं। वर्तमानत्वं च स्वाधिकरणक्षणावच्छिन्नकृतिजन्यक्रियाजन्यफलानुकू
लक्रियानुकूलत्वविशिष्टप्रतियोगित्वसंबंधेन व्याप्तिग्रहोपायकथनस्यानुमानप्रामाण्यव्यवस्थित्यौपयिकत्वाभावात् सर्वमिदमि
दामिति ग्रंथेन निष्पन्नत्वात्तदनुकूलत्वकृतेर्भावितत्वात्। अथानुमानेन न प्रमाणमिति शाक्यचार्वाकमतनिरासस्य स्वपदेन ग्रहणात् संभ
वात् तथा चानुमानप्रामाण्यव्यवस्थापनस्य चार्वाकादिनिरासहेतुत्वं परं त्विदानीं नत्वित्यसंभवतीति। तस्यासिद्धत्वादिति भावः॥
न च व्याप्तिग्रहोपायस्य च वक्ष्यमाणत्वेति ग्रंथावतारणव्याप्तिग्रहोपायप्रतिपादनेति दीधितिग्रंथाभ्यामेवोपायनिरूपणावसरलाभा
लाभेनाथैन एवं समारब्धत्वस्याभावात् किंतु उपादानेनेति वाच्यं। भावप्रमाणानस्योपयोगितज्ञानलाभेऽपि तादृशबोधे तज्ज्ञानलाभा

थेनिदुक्तेः। सामिकोपसर्गस्य फलं द्योतकत्वं। फलं च व्यवस्थितिरेव। आङ्पूर्वकरभधातोराद्यक्षणत्वमर्थः॥ आद्यक्षणित्वं च स्वविषयक
क्षणिध्वंसासमानकालीनस्वविषयकक्षणित्वं। अतीतत्वं विषयत्वं। क्तप्रत्ययार्थः। अतीतत्वं च वर्तमानकालवृत्तिध्वंसप्रतियो
गित्वं। वर्तमानकालश्चनेन्द्रियाद्यधिकरणकालः। तथा च वर्तमानकालवृत्तिध्वंसप्रतियोगिनी स्वकृत्या या आद्यक्षणित्व
द्विषयत्वं समारब्धत्वं। ननु क्त्वाप्रत्ययार्थाभिन्नविषयत्वे क्त्वाप्रत्ययार्थाभिन्नाभिमतत्वान्वितत्वस्य धातोरर्थान्वयो न घटते। प्रत्ययानां
केवलप्रकृत्यर्थान्वितस्वार्थस्यैव बोधकत्वेन स्वार्थान्वितप्रकृत्यर्थान्वितस्वार्थबोधकत्वान्वितसंभवा[illegible]दिति चेन्न। प्रतिद्व
न्द्विलिंगं पञ्चयदिहासोवर्तमानध्वंसप्रतियोगिनी यावतिष्ठातः कर्मभिन्नलिंगामिन्नर्थान्वयबोधकत्वाभिन्नप्रत्ययानामेकस्वा
र्थान्वितप्रकृत्यर्थान्वितस्वार्थान्तरबोधकत्वस्यापि स्वीकारात्। नन्वतीतकृतिनिरूपितव्यक्तत्वघटकस्वपदार्थत्वं नभावपुपापनि
रूपणादेः संभवतीत्यत आह॥ परीक्षेति॥ परीक्षायाः परमतनिराकरणपूर्वकतत्पदिसिद्धान्तानुमानं न प्रमाणमित्याद्यं
थस्य परमतनिराकरणानुकूलत्वं वा परीक्षात्वं। पत्वं भवत्वेव स्वपदार्थत्वं वा तद्विषयकज्ञानत्वमित्याभावः। परमतेति। परमतं
परासिद्धार्थेऽनुमानाप्रामाण्यं मान्निराकरणेन द्विविषयकज्ञानेमध्यस्थस्याप्रामाण्यज्ञानसंपादनं तत्पूर्वकं स्वमतव्यवस्थापनं

स्वसिद्धयुक्तिजन्यव्यवस्थितिजनकत्वाद्रूपयोगः। अनुमानप्रामाण्यस्यैवाभावादत्रापरार्थैकदेशाव्यवस्थितान्वयः। तथा चानुमानप्रामाण्यपरीक्षा
पदेन परसिद्धार्थानुमानप्रामाण्यविषयकत्वात्‌ तद्धर्मिकप्रामाण्यज्ञानसंपादनोत्तरकालीनस्वसिद्धयुक्तिजन्यानुमानप्रामाण्यविष
यकव्यवस्थितिविषयकत्वाद्रूपयोगलाभः। परमतसिद्धो योर्थोनुमाने प्रामाण्याभावः तन्निराकरणं तस्याननुष्ठेयप्रयोजकव्यापा
रः। तत्पूर्वकं स्वाभिप्रेतार्थोनुमानाप्रामाण्यं तद्विषयकज्ञानानुकूलव्यापारत्वात्‌ केचित्‌। तस्य च ज्ञापकत्वरूपेण प्रयोजकत्वरूपं ज्ञान
कत्वं बोध्यं। परभिप्रेतार्थज्ञानप्रतिबन्धकज्ञानानुकूलव्यापारत्वेन परीक्षा। प्रतिवादिनं प्रति स्वस्यापि परत्वात्‌। तत्कर्तृकव्यापारस्या
पि तथात्वापत्तेः। तत्र परीक्षात्वापि अरत्तनु एतादृशनिरासपूर्वकस्वज्ञानतन्निर्धारकव्यापारस्यैव परीक्षापदार्थत्वात्‌। एवमप्रामाणसाधर्म्ये
ने प्रोक्तेः परमतनिराकरणपरतया स्वमतव्यवस्थापनपरतयैव समारब्धत्वादिवारस्यं बोध्यं। प्रारब्धाभावेनेति। तत्र तन्निरूप्यमानप्रतिपा
दनस्य निरूपकत्वाद्रूपपरीक्षाप्रतिकारणत्वेनैव संभवद्युक्तिकमिति वाच्यं। परीक्षापदार्थत्वात्‌। दर्शितमते स्वमतव्यवस्थितिरूपानुमितौ
व्याप्तिपक्षधर्मतोपपादकप्रतिपादनस्य हेतुत्वेन तद्विशिष्टकारणत्वादेः। कथं तच्च तत्र स्वस्य हेतुत्वमिति चेत्‌। इत्थं अप्रामाण्यरूपसाध्यानुमापक
चार्वाकोक्तहेत्वनुमानज्ञाने यन्मध्यस्थस्य ज्ञानं तादृशहेत्वनुमानज्ञाने तस्य प्रामाण्यज्ञानसंपादनार्थं प्रथमतः प्रामाण्यसाधकहेत्वनुमानं

तस्य संपादनीयं नच तन्न संभवति । इंद्रियत्वादावेव प्रमितिजनकतावच्छेदकतायाः प्रसिद्धत्वात् । नाद्रोडियत्वाभाववत्तानस्यैव स्वरूपासिद्धिरा
नरूपस्य मध्यस्थे विद्यमानत्वात् । एवं चताद्रूप्यासिद्धिनिवारणपूर्वकहेतुमत्तासंपादनार्थं व्याप्तिग्रहोपायप्रतिपादनमिति रीत्याक्षा
ख्यातसंबोध्या । प्रतिपादनं प्रतिपत्तिजनकत्वाद्बहुप्रयोगः । तदेकदेशप्रतिपत्तौ व्याप्तिग्रहोपायविषयजिज्ञासाभेदात्त्वयः । कारणीभूतानां नैय्य
र्थ्यमाशंकते । यद्यपीति ॥ तस्याव्याप्तिग्रहोपायप्रतिपादनस्यावतारणासंगमितिसमीत्या द्वियंथः । एवं चतद्रूपेनोपायप्रतिपादने समा
सरव्याप्त्यनुमानप्रामाण्यपरीक्षाकारणत्वस्य चनसंभवे पुनः कारणीभूतानामभिधानं पुनरुक्तियस्तामितिभावः । तच्छ्राभात् । व्याप्तिग्र
होपायप्रतिपादनस्यावश्यकत्वाभावात् ॥ कारणीभूतानामुपादाने एकोपायप्रतिपादने उक्तरीत्याव्यस्यापि प्रामाण्यव्यवस्थापनजन
कत्वस्य धर्मिपारतंत्र्येण तज्जनकव्याप्तिस्वरूपनिरूपणेऽलाभोभवतीनान्यथेति । सामग्र्यंतरेण कथमपि तदसंभवतामनाय पुनः
कारणीभूतानां कीर्तनं रव्यात्रयेण समाधत्ते । तथापीति । नचतत्रतत्प्राभः किमर्थमिति वाच्यं । उपायप्रतिपादनस्य जनकव्याप्तिस्वरू
पनिरूपणे परीक्षाजनकत्वस्यापि लाभेनात्रयं तावत्रयकत्वाभावात् ॥ एवमपीति । ननु प्रामाण्यव्यवस्थापनं । नचतत्स्वरूपनिरूपणं
विना प्रामाण्यव्यवस्थापनं नसंभवतीति स्वरूपनिरूपणे एव प्रामाण्यव्यवस्थापकत्वमुच्यतामिति वाच्यं । व्याप्तिस्वरूपनिरूपणे प्रा

माण्यव्यवस्थापनसाक्षात्कारणताबाधान्नेति संप्रदायः। वस्तुतो नैव्यायिकहेतोः स्वरूपासिद्धिवारणायोपायनिरूपणेनं साधनाम
सिद्धिवारणाय व्याप्तिस्वरूपनिरूपणमिति साक्षात्कारणतापि बोध्या। यद्वा संगतिसिद्धमिदं रत्यादि अवतारणग्रंथेन व्याप्तिग्रहोपाय
प्रतिपादने प्रामाण्यव्यवस्थापनकारणत्वाभावसंभवेपि व्याप्तिस्वरूपानिरूपणस्य केवलव्याप्तिग्रहोपायप्रतिपादननिदानत्वसं
भवेपि न कथमपि व्याप्तिस्वरूपानिरूपणे प्रामाण्यव्यवस्थापकत्वविशिष्टव्याप्तिग्रहोपायप्रतिपादननिदानत्वस्य लाभः संभवतीति॥
एवंच प्रामाण्यव्यवस्थापकत्वविशिष्टोपायप्रतिपादननिदानीभूतं व्याप्तिस्वरूपादन्यस्यैव निरूपणमस्तु तावता केवलव्याप्तिग्रहोपा
यप्रतिपादननिदानीभूतं व्याप्तिस्वरूपनिरूपणारंभोऽथैव नरयस्तमित्याशंकाया भावादत्र निदानत्वेपि व्याप्तिस्वरूपनिरूपणस्यैवेति
वक्तव्यं। तत्र कारणीभूतज्ञानविशेषणात्संभवतरीति कारणीभूतज्ञानसाधर्म्यमित्याशयेनाह॥ तथापीति॥ मदादिति। प्रामाण्यव्यवस्थाप
कत्वविशिष्टव्याप्तिग्रहोपायप्रतिपादनमित्यर्थः। व्याप्तीति। धूमव्यापकवह्निसमानाधिकरणधूमत्वादिकं व्याप्तिः। व्यापकत्वं च
प्रति व्यभिचारग्रहो हेतुः। सहचारविशिष्टधूमत्वादिग्रहे सहचारग्रहो हेतुरित्याकारकोपायनिरूपणे सिद्धांतसिद्धव्याप्तिस्वरू
पनिरूपणस्य स्वतंत्रान्वयव्यतिरेकसत्त्वाद्दत्तत व्याप्तिस्वरूपकथनस्य प्रकृतोपायनिरूपणस्य दुष्करत्वादिति भावः। एतत्प्रभा

त॰टी॰वं॰ धर्मेव व्याप्तिघटकीभूतत्वात्। ननु निरूपणस्यापि घटकताविषयकत्वात् तदर्थं प्रयोजनाभावात्। नन्वेवं व्याप्तिस्वरूपनिरूपणमार
भ्यत इति कथनमयुक्तं। तादृशव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमित्यस्यैव सम्यक्त्वात्। निदानमित्यभेदसं
बंधेन निरूपणक्रियाविशेषणमित्यत आह। प्रथममिति। धात्वर्थो निरूपणं केवलस्य तानानुकूलव्यापारः। दृष्टयोगलक्षणः। द्विती
यार्थो विषयित्वं। तदेकदेशे तानेऽन्वेति। आख्यातार्थः कृतिः। तस्याधात्वर्थेऽन्वयः। आख्यातार्थपर्यवसानत्वस्य कृतावन्वयः। न
न्वित्यादिनेति। तृतीयार्थोऽभेदः। धात्वर्थेन धनप्रतीतिवत्। तथा च निरूपणसाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानभि
न्नं नन्वनुमितिहेतुव्याप्तिज्ञानेत्यादिग्रंथाभिन्नं यद्व्याप्तिस्वरूपनिरूपणं तदनुकूलेदानीन्तनकृतिमान्मणिकार इति बोधः॥
तथा चेदानीं नन्वित्यादिना प्रदर्शितत्वाभिधानादिदानीन्तनकृतेः नन्वित्यादिग्रंथाभिन्ननिरूपणानुकूलत्वं तथा अन्योन्याभावो प्रतियोग्य
समानाधिकरणेत्यादिव्याप्तिस्वरूपविषयकनिरूपणानुकूलत्वं तथा व्याप्तिस्वरूपनिरूपणानुकूलत्वं वर्तमानकृतिमत्त्वस्य मणिकारे बाधा
द संगतिरित्यर्थः। आरभत इत्यत्रैकत्वमिति॥ द्वितीयार्थो विषयित्वं। आङ्‌ पर्यवसानार्थ धात्वर्थकृतिरित्यर्थः। प्राग्वत्तदाविषयकधात्वर्थयोगा
त्। आख्यातत्वमाख्यातार्थः। शेषं प्राग्वत्॥ एवं च तादृशनिदानाभिन्नं यत् तादृशग्रंथाभिन्नं व्याप्तिस्वरूपनिरूपणं तद्विषयकायत्न

स्याश्रयो मणिकारस्येति बोधः। नन्वेवमपीदानींतनाप्यकृतेः सिद्धान्तसिद्ध्याति स्वरूपनिरूपणानुकूलतया ऽसंगतिर्दुर्वारैवेत्यत आह। नि
रूपणस्येति। तदारंभणरूपत्वेति।। मद्विषयकाख्यकृतिविषयत्वेत्यर्थः। तथा च निरूपणस्य परममतेत्यादिरूपत्वोपगमेनान्वित्यादि
ग्रंथस्यापि निरूपणपदार्थत्वेन तत्तद्विषयकाख्यकृते निरूपणविषयकत्वमक्षतमेवेति आरम्भतस्य क्रिया संगतिः। नन्वेवं निरूपणी
त्यानुकिं पक्षेपि धात्वर्थनिरूपणस्य परममतनिराकरणपर्यकत्वमनव्यवस्थितिनिरूपत्वस्वीकारे बाधकाभावादुक्तरीत्यान्वित्यादि
ग्रंथानुकूले तदानींतनकृतेर्निरूपणाविषयकत्वमनपवादमिति वाच्यं। आरम्भतस्य क्रियाकृतौ आद्यकृते सर्वविषयकत्वस्वीकारेण निरूप
णपदस्य यथाश्रुतार्थत्वेप्यनुपपत्त्यभावात्। न च निरूपणीयत्वकिं पक्षेपि आरम्भतस्य तेन कृतित्वेनाप्यकृतेरेव बोधनस्वीकारात् तदार
म्भतस्येति व्यर्थमेवेति वाच्यं। निरूपणीयत्वेनेति पमत आद्यकृतिबोधने मानाभावात्। आरम्भतस्य क्रियमाणे आद्यपूर्वकृत्यभावानु
ना ऽप्यकृतेरेव बोधनाद्यनुपपत्त्यभावात्। नन्वेवं आद्यनः सर्वविषयकत्वस्वीकारस्यावश्यकतया निरूपणपदस्य परमतेत्याद्यर्थ
कत्वकथनं व्यर्थमिति वाच्यं। निरूपणपदस्य प्रतियोग्यसमानाधिकरणेत्यादि। निरूपणमात्रपरत्वे ... स्य नान्वित्यादिनेति ...
नीयार्थभेदस्य वक्तव्यतया तदसंगतिः। स्यादतस्तत्पदस्य पर्वपिसमत्वखंडनपरत्वोक्तिरिति। नत्वनभावादिति प्रतियोगिपदासत्पीद

१० नर्थकमित्यत आह। व्याप्तिरिति। अत्र केवलान्वयिन्यभावादिति। मणिकारोक्तहेतुना व्याप्तौ अव्यभिचरितत्वरूपाव्याप्यसाध्याभा
ववद्वृत्तित्वादि निरुक्तव्याप्तिलक्षणघटितत्वावच्छिन्नभेदकूटः साधनीयः। न चैवं सति भिन्न चेत् केवलान्वयिहेतुनिरूपितनिरूपितत्वाभावरूप
हेतोः सिद्धान्तसिद्धव्याप्तावसत्त्वादित्यतः अव्यभिचरितत्वं पक्षः। व्याप्तिभेदः साध्यः कृतः। उक्तभेदकूटसाधनेनाभावादिति। ननु
एकीभूतेनमपि अधिकमित्यापि दूषणं बोध्यं। नन्वव्यभिचारितत्वस्यैव पक्षत्वे पक्षानुगतं पक्षतावच्छेदकं निर्वक्तुमशक्यमित्यतोऽव्य
भिचारपदार्थत्वेन पक्षत्वं दर्शयति। तथा चेति।। न चानुगतं पक्षतावच्छेदकं। किमर्थमेकैकमपि पक्षत्वसंभवादिति वाच्यं।। तथा स
ति नानाप्रतिज्ञाकरणापत्तेः। यस्य न पक्षत्वं तस्य व्याप्तित्वशंका संभवात् तत्सामान्यतोऽव्यभिचारपदजन्यप्रतीतिविषयत्वेन पक्षत्वं दर्शि
तं व्याप्तेः। पक्षत्वे न वा व्याप्तिरव्यभिचारपदार्थेनैकैकसंभवात्तथानोक्तं। एतेन व्याप्तौ व्यभिचारपदार्थभेदसाधने विशेषभेदकूटस्य हेतुत्वं
। परं तु तत्र केवलान्वयिन्यभावादिति न हेतुरित्याशंक्य विशेषेषु केवलान्वयिन्यभावरूपहेतुना प्रथमतो व्याप्तिभेद एव साध्यः।।
१२ ततः स्वनिरूपितप्रतियोगित्वसंबंधेन विशेषणात्। व्याप्तौ विशेषभेदकूटद्वारितत्वं नादेयं। गौरवात्। अयमरीत्या सिद्धभेदसाधने बा
धात्। नन्वनानुमितिजनकज्ञानविषयस्य सिद्धान्तसिद्धव्याप्तिभेदसाधने सिद्धसाधनं नादरणस्य साध्याभाववद्वृत्तित्वादि

रूपव्याप्तिभेदे साधने बाधः। पक्षे स्वव्यापकसाध्यसमानाधिकरणहेतुमात्रं हेतुश्च साध्याव्यभिचारीति समूहालंबनस्यानुमितिज
नकत्वात्। एवं साध्याभाववदवृत्तित्वादिरूपान्तरव्यभिचारपदार्थाभावो हेतुः स्यात् तत्र प्रत्येकं हेतुत्वे भागासिद्धिः। कूटस्य हेतुत्वे स्वरूपा
सिद्धिः। अनुमितिजनकतायां अव्यभिचारविषयकत्वानावच्छिन्नत्वसाधने अनुमितिजनकतानिरूपितावच्छेदकावच्छेदेनाव्यभिचाराविषय
कत्वसाधने वा बाधः। सामानाधिकरण्येन तत्साधने सिद्धसाधनमित्यत आह। अनुमितिजनकतामिति। लक्षणघटकतया सम्भवोक्त्या
अत्र साध्ये हेतौ वा हेतुमत्वे वाऽव्यभिचारपदार्थविषयिताघटितधर्मावच्छिन्नत्वाभावसाधने वह्न्यभाववदवृत्तिः पर्वतो वह्निमान् धू
मादित्यादौ वह्निव्याप्यधूमवान् वह्न्यभाववदवृत्तिः पर्वत इत्याकारकपरामर्शानिष्ठानुमितिजनकतायां धर्मितावच्छेदकावच्छिन्नविषयि
ताविधयाऽव्यभिचारपदार्थावच्छिन्नविषयितावच्छिन्नत्वसत्त्वेन बाधः। कूटरूपं हेतौ स्वरूपासिद्धिश्चेति हेतुर्निवेशः। एवं च तादृशा
जनकतायां अव्यभिचारपदार्थावच्छिन्नविषयितावच्छिन्नत्वे सत्यपि तादृशापदार्थावच्छिन्नहेतुविषयितावच्छिन्नत्वाभावसत्वान्न
बाधादिः। न च तथापि वह्न्यभाववदवृत्तिधूमवान् महानसस्वरूपः। पर्वतो वह्निमान् धूमादित्यादौ भ्रमस्थलीयपरामर्शजनकतायां
बाधादिर्दुर्वार इति वाच्यं। अव्यभिचारपदार्थावच्छिन्नहेतुविषयितानिरूपितपक्षतावच्छेदकावच्छिन्नविषयिताघटितधर्मा

वच्छिन्नत्वाभावसत्त्वेव साध्यत्वादिविवक्षणेनादोषात्॥ न च तथापि पर्वतो वह्न्यभाववान् द्रव्यत्वादित्यादौ हेतुतावच्छेदकपर्यन्तस्य व्याप्तित्वम
ते हेतुव्यापकवह्निसमानाधिकरणवृत्तिवह्न्यभाववद्द्रव्यत्वत्वरूपहेतुतावच्छेदकत्वात् पर्वतादृशाकारकानिर्धर्मितावच्छेदककपराम
र्शजनकतायां बाधादिदुर्वारः। न स्वोक्तादृशहेतुतावच्छेदकरूपाव्यभिचारपदार्थघटितहेतुविषयितानिरूपितपक्षतावच्छेदकावच्छि
न्नविषयितावच्छिन्नत्वस्य सत्त्वादिति वाच्यम्॥ पर्याप्तिनिवेश्याव्यभिचारपदार्थपर्याप्तविषयितानिरूपितहेतुविषयितानिरूपितप्रकृत
पक्षविषयिताघटितधर्मानवच्छिन्नत्वविवक्षणात्। न चोक्तस्थले एव हेतुव्यापकवह्निसमानाधिकरणवृत्तिवह्न्यभाववद्द्रव्यत्वत्वव
द्वह्न्यभाववद्वृत्तितागपर्वतेऽदृशं नास्ति धर्मितावच्छेदककपरामर्शजनकतायां व्याप्तिधर्मितावच्छेदकीभूताव्यभिचारपदार्थमा
त्रपर्याप्तधर्मितावच्छेदकताप्रकारविषयितानिरूपितहेतुविषयितानिरूपितप्रकृतपक्षविषयिताघटितधर्मावच्छिन्नत्वस्य सत्त्वा
द्बाधादिदुर्वारमेवेति वाच्यम्॥ अव्यभिचारपदार्थघटितविषयितायां धर्मितावच्छेदकताभिन्नत्वरूपविशेषणदानात्॥ न चैवं हेतुप
दमनर्थकं वह्न्यभाववद्वृत्तिः पर्वत इति पक्षकपरामर्शे वह्न्यभाववद्वृत्तित्वविषयितायाः धर्मितावच्छेदकरूपत्वेनादोषादिति वाच्यम्।
पर्वतो ~~वह्न्यभाववान्~~ वह्न्यभाववद्वृत्तेरित्यादौ वह्न्यभाववद्वृत्तिव्यापकसाध्यसमानाधिकरणहेतुमान् पर्वत इति परामर्शजन

कत्वायां वह्न्यभाववद्वृत्तित्वव्यापकत्वं तन्मात्रस्य बाधादिवारणाय हेतुतावच्छेदकावच्छिन्नविषयताकत्वार्थं हेतुपदं। वह्न्यभाववद्वृत्तित्वे मम सत्त्वादात्मे-
न हेतुतास्थलेऽपि हेतुपदप्रयोजनं बोध्यं। अत्रानुमितिजनकत्वानन्तर् इत्यनुवर्तनं। तत्र तत्सम्बन्धेन निवेशः। तथा च तादृशतावन्निष्ठजनकताकत्वमिति
केचित्। एवमपि निष्कर्षाभावात्। अव्यभिचारविशिष्टत्वविवक्षणे तु न निवेशितं। अव्यभिचारितत्वेन धूलिपटलादिभ्रमव्यावर्तनस्यादिति।
अव्यभिचारपदार्थो हेतुविषयतावच्छेदकत्वेन विशेषितः। व्यापकसामानाधिकरण्यत्वेनाव्यभिचारपदार्थावच्छिन्नहेतुविषयताभेदाय वा-
धवारणाय निरूप्यनिरूपकभावापन्नविलक्षणावच्छेदकतायाः प्रमीयावच्छेदकताया वा निवेशः। न चैवं साधनप्रसिद्धौ समभ्यभिचा-
रपदार्थावच्छिन्ने व्याप्तिक्रमेण च साधनादिकमेव पर्वं पक्षशरीरनिविष्टत्वान्यायेन तथोक्तमिति। नन्वत्राव्यभिचारपदार्थोऽनुमितिजनकताव-
च्छेदकहेतुविषयतावच्छेदकहेत्वेवास्तु। न च वह्न्यभाववद्वृत्तित्वपर्वतो वह्निमान्धूमादित्यादौ अव्यभिचारे परामर्शनिष्ठजनकतावच्छे-
दकीभूतपक्षविषयतामादाय बाधः स्यात् हेतुपदनिवेशानवारणेऽपि वह्न्यभाववद्वृत्ति धूमवान् महानसधर्म पर्वतपक्षकोऽयं स्थलेऽपि परा-
मर्शनिष्ठजनकतावच्छेदकहेतुविषयतावच्छेदकत्वसत्त्वेन बाधः स्यादिति वाच्यं। परामर्शावच्छेदकावच्छिन्नविषयतानिरूपितत्वेन हेतुविष-
यताया विशेषणीयत्वात्। न चैवमपि वह्निमान् वह्न्यभाववद्वृत्तेरित्यादौ हेतुतावच्छेदकपर्यन्तव्याप्तिसत्त्वाज्ञाने हेतुव्यापकसाध्यसमा-

ग॰टी॰पं॰

नाधिकरणवृत्तित्वविशिष्टाभाववद्वृत्तित्ववद्धूमवानिति निर्धर्मितावच्छेदककपरामर्शमादाय बाधहेत्वेति वाच्यं ।। तादृशहेतुविषयतावच्छेदकताप
र्याप्त्यभावस्य वाच्यत्वात् ।। न च तत्रैव हेतुव्यापकवह्निसमानाधिकरणवह्न्यभाववद्वृत्तित्ववद्धूमाभाववद्वृत्तिमानिति अन्यधर्मितावच्छेद
ककपरामर्शविषयहेतुविषयतावच्छेदकतापर्याप्तिसत्त्वेन बाधो दुर्वारः ।। एवं हेतुपदानुपादाने पर्वतो वह्न्यभावव्याप्यवह्निमान् वह्न्यभाववद्वृत्तिम
नद्रूपासिद्धौ तादृश्येन हेतुतत्स्थले हेतुव्यापकसाध्यसमानाधिकरणवृत्तिवह्न्यभाववद्वृत्तिमत्त्वान् पर्वत इत्यादिरीत्या न कस्यां हेतुस
मानाधिकरणोऽयं मादाय बाधः ।। तादृशहेत्वावच्छेदकविषयतायाः परंपरायाश्च पक्षविषयतानिरूपितत्वादिति वाच्यं ।। तादृशहेतुता
वच्छेदकावच्छिन्नहेतुविषयतानिरूपितधर्मितावच्छेदकतानामकावच्छेदकतापर्याप्त्यभावस्य विवक्षणीयत्वादिति चेन्मैवं । तथा सति साध्य
हेत्वोरभेदप्रसंगात् ।। तद्भिन्नेति । न च व्यभिचारितत्त्वैनैव साध्याभाववद्वृत्तित्वादिभिन्नमिति नार्थः । अपार्थक्यापत्तेः । अन्यत्वं
साध्याभाववद्वृत्तित्वादिरहेतुयोजितानेकप्रकारकप्रतीतिभावाद्देहे । व्याप्तिरिति । न च व्यभिचारपदार्थे व्याप्तिभेदसाधने केवलान्व
यिन्यभावादित्येव हेतुः । तत्र साध्याभाववद्वृत्तित्वान्यत्वमसद्रूपत्वामिति वाच्यं । उक्तरीत्या बाधात् ।। तद्भिन्नेति । नञो वैयर्थ्याच्च । न च
यथाश्रुतं न दूष्यं । सत्सोऽन्यद्व्यामिति रीत्या विशेषेषु द्रव्यभेदासिद्धौ न सामान्ये गुणे न सिद्धिः तथा च स्वपक्षे साध्याभाववद्वृत्तित्वादौ व्याप्ति

भेदसिद्धौ सामान्यतोऽव्यभिचारपदार्थेऽपि तद्भेदसिद्धिरनिवार्या।अव्यभिचारपदार्थद्वयविशेषेषु व्याप्तिभेदव्याघातेन।स्वविशेषणे च व्याप्तिभेद
कस्वरूपसाधनाप्रसिद्धेर्दुर्वारत्वात्॥ननु व्याप्तित्वाभावः व्याप्तिपदानुषंगलभ्यमनन्तरव्यभिचाराविषयकत्वं भवत्वव्यभिचारविषयकत्वं वा न हेतुः
विशिष्टवैशिष्ट्यस्य तत्त्वे व्यभिचारात्।तत्तदव्यभिचारविषयकत्वानवच्छिन्नत्वोक्तौ चत्त्वाभाववद्वृत्तिपर्वतादिपक्षकपरामर्शीयजनक
तायां स्वरूपासिद्धिश्चेत्यत आह। तथा चेति। हेतोः साध्याभाववद्वृत्तित्वधर्मवत्पर्वतत्वादिनिरविशिष्टवैशिष्ट्यबोधीयजनकतायां प्रति
योगाप्रसिद्धिवारणाय द्रव्यपर्याप्त्यनिवेशाद्वा स्फोरकं न च विवेशस्य निष्फलत्वा योजनकत्वात्।तेन विशेषणतावच्छेदकप्रकारकत्वेन हेतुतामत
ेऽपि न तदप्रसिद्धिः। अव्यभिचारपदार्थाः इति सामान्यविशेषभावत्वाभावयन्तु हेतुघटकं वैयर्थ्यापत्तेः। अविवक्षितादि। अव्याप्यवृत्तितामते सं
योगाभाववद्वृक्षस्य संयोगसामान्याभावव्यभिचारित्वस्य विवादेऽपि मतान्तरनिरूपितविशेषाभाववद्वृत्तस्य सामान्याभावव्यभिचारित्वस्य को
प्यनभ्युपगमादिति भावः॥ तथा च विशेषाभाववद्वृत्तित्वानुपादि सामान्याभाववत्त्वानभ्युपगमादासामान्याभावविरोधिमान्यस्यादित्येवानुकूल
तर्कः। स च पक्षतावच्छेदकसामानाधिकरण्येनोपादकतया सानजन्यतया न तद्वच्छेदेन सामान्याभाववत्त्वानिश्चयेऽप्युपजायते केवला
न्वयि साध्यकानुमितिजनकपरामर्शावृत्तित्वस्य हेतुत्वे स्वरूपासिद्धिरत आह। साध्येति। केवलान्वयिनिरूपणकालीनतादृशा

१२ ऽनुमितिजनकत्वेन अव्यभिचारपदार्थावच्छिन्नहेतुविषयताकत्वाभावादित्यर्थः । नहि रहकालिकेनैतत्वेन हेतुत्वसिद्धिवारणाय कालि
नान्तं ।। व्यतिरेकिण्यपि केवलान्वयित्वेन तादृशाव्यभिचारभानं दृष्टम् । अत्राभावे प्रतियोगितासंबंधेन व्यापकत्वेन प्रतिमाहर्त्तृत्वप्र
तसंबंधावच्छिन्नव्याप्यत्वाभावत्वेन प्रतिबंधकमित्यादिकमस्तु ।। साध्यवद्भेदसहचारितत्वलक्षणानुसंधेनाद्वितीयकेवलान्वयित्वोपादानं
नन्वत्रानुमितिजनकत्वेनेमादृशाविषयकत्वाभावोनहेतुः ।। स्वरूपासिद्धेः मादृशज्ञानस्यापक्षधर्मत्वात् ।। नापि मादृशाविषयता भन्ना
नुमितिजनकत्वं । नहि विशिष्टज्ञानत्वं वा स्वरूपासिद्धेः । अतएवेनमादृशाविषयतानात्मज्ञानानाद्यन्तत्वं । अव्यभिचारितत्वे हेतुव्यापक
सामानाधिकरण्योभयज्ञानमादृशीकरोपीत्याण्णाभावमादृशाविषयताभन्यत्वं वा सहजनिवार्यं ।। विशिष्टैवैशिष्ट्यबोधजनक
त्वाव्यभिचारादित्यत आह ।। एवं चेति । मादृशाविषयतानन्तरव्यभिचारित्व विषयतादर्शिसाध्यं न कुटघटकीभूतपदेकाभाव
रूपं नास्तिव्याप्तिरित्यादिनान भूदयवैयर्थ्यपरिग्रहः । अग्रिमेति । नापीत्यादिग्रंथदूषणरूपाः केवलान्वयिव्यभावादयः परि
ष्कारविशेषाः सत्यपि शोधेयत्वानिरूपकाधिकरणे आदिक्रमेण मादृशव्याप्तियोग्यधिकरणसामान्यवत्त्वावच्छिन्नहेतुवि
षयताघटितधर्मावच्छिन्नत्वादिसाधकाः ।। मादृशहेतुविषयकज्ञानत्वनिरादयः इत्यर्थः ।। यद्यपि मादृशारीत्या ऽव्याप्ति दर्शि

नस्य तत्तद्भेदानुमितौ व्यभिचारवारकतया व्याप्तिमद्दर्शनस्य च सार्थक्येऽपि असंभवप्रदर्शनं वैयर्थ्यं। तथापि विरुद्धत्वग्रहे पर्वतभेदा
नुमित्यनुपपत्तिः स्यादिति न तद्दर्शनं। यद्वा व्याप्तौ सामानाधिकरण्येन लक्षणग्रहादवच्छेदकावच्छेदेन तत्तत्संशयनिवृत्तिसंभवेऽपि सा
मानाधिकरण्येन तत्संशयोऽनुवर्तते असंभवे तु यद्धर्मपीति विशेषव्युत्पादनाय पृथक्कृतमुभयोपादानं। एवं च सामानाधिकरण्येन
तत्तत्संशयवारणायावच्छेदकावच्छेदेन लक्षणग्रहोऽव्याप्तिनिरासफलमिति॥ अव्याप्यवृत्तिसाध्यकेति। दीधितौ अवच्छेदका
वच्छेदेनान्वयस्यौत्सर्गिकतया। व्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेन लक्षणसत्तामिति नियमोऽभिप्रेतः। न च अव्याप्यवृत्तिसा
ध्यं यस्य सः अव्याप्यवृत्तिसाध्यकः नास्त्यश्चासौ सद्धेतुश्चेति व्युत्पत्त्या कपिसंयोगी गगनादित्यादौ व्यभिचार इति वाच्यं॥ तत्पदस्य
वृत्तिमदर्थकत्वात्। नन्वेवमपि कपिसंयोगाभाववान् गुणत्वादित्यादौ व्यभिचारः॥ न च व्याप्यवृत्तिसाध्यं यत्र तदव्याप्यवृत्तिसाध्यकं
न च तत्र वर्तमानो यो हेतुरिति व्युत्पत्तेः साध्यनिष्ठव्याप्यवृत्तित्वानिरूपकाधिकरणवृत्ति हेतुत्वावच्छेदेनाव्याप्तिरिति निष्कर्षेण हे
त्वन्तरितिवाच्यं। तथासति तत्पदवैयर्थ्यापातात्। तत्पदवाच्यादेर्व्याप्यवृत्तिधर्मस्य भटकौ च कपिसंयोगित्वादित्यादौ निरुक्तोद
रूपतावच्छेदकविधिर्वोभयाकांक्षिते अव्याप्तेः। परं लक्षणेन दुर्वारत्वादसंगतिः। हेतुपदस्य व्याप्तिमदर्थकत्वेऽपि कपिसंयोगाभो

वृत्ती द्रव्यत्वादिकमादाय नियमविषयस्य साध्यवद्देशप्रसिद्ध्यापरलक्षणेनासंग्रहादसंगतिरिति चेन्न अव्याप्यवृत्तिरव्याप्यवृत्तिकपिसंयु
क्तसत्त्वानवच्छिन्नवृत्तिकान्यत्वमव्याप्यवृत्तित्वमित्यदोषात् । गगनवान् व्योमादित्यादौ साध्ये निरुक्ताव्याप्यवृत्तित्वसत्त्वेऽपि न दृष्टिकरणाप्र
सिद्धेर्नोभयलक्षणासंगतेः प्रसक्तिः । हेतुमत्त्वस्य तत्राभावात् । न च यत्किंचिज्जन्यसाजातीयतया वाच्यत्वादिघटितो यथा तत्रापि
उभयलक्षणेन नरस्यासिद्धारणमिति वाच्यं । निरवच्छेदकत्वे विरूपकत्वेन तस्य प्रकृतेऽव्याप्यवृत्तित्वात् ।। केवली
न्वयिनि पृथक् दोषस्योत्कीर्तनतया केवलान्वयिभिन्नाव्याप्यवृत्तिमद्धेतुसामान्येऽव्याप्तिरेव नियमः । केवलान्वयिभिन्नत्वं ।।
अन्योन्याभावप्रतियोगितानवच्छेदकत्वं मिति । न कोऽपि दोषः । अव्याप्यवृत्तित्वं स्वाभाववत्समानाधिकरण्यं । ननु निरवच्छिन्नवृत्ति
कान्यत्वं । संयोगी द्रव्यत्वादित्यादौ निरवच्छिन्नापत्तेः । प्राचीनमते द्रव्ये संयोगसामान्याभावासत्त्वेनोक्तरूपाभावच्छेदकाकाशे न प्रत्या
प्यभावात् । तु स्वप्रतियोगित्वे सति समानाधिकरणत्वं स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे परसंबन्धेन
यत्किंचिदभावावच्छिन्नत्वमव्याप्यवृत्तित्वं । तीयसंबंधनिवेशपक्षेऽपि संयोगाभाववान् गुणत्वादित्यादेरसंग्रहः । प्रथमसंबं
धनिवेशपक्षे काभावमादाय द्वितीयसंबंधनिवेशे द्रव्यत्वाभावमादाय च द्रव्यत्वस्याव्याप्यवृत्तित्वेऽपि च द्रव्यत्वस्य साध्य ॥ १२ ॥

कपृथिवीत्वादेर्न संग्रहः ।। कपिसंयोगी एतद्वृक्षत्वादित्यादौ साध्यसद्व्यानभावेण कपिसंयोगाभावसामानाधिकरण्यस्य गुणान्न
भावेन न समानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्य प्रतियोगित्वस्य च सत्त्वेनोक्तरीतिनयसंबंधेन कपिसंयोगाभावरूपयत्किंचि
दभावविशिष्टत्वासंग्रहः । एतेन सर्वप्रमेयवानिति यत्किंचित्स्वानुयोगिके विषयतासंबंधेन साध्यतायां घटत्वादिहेतौ निरवच्छिन्नवृत्तिक
स्वरूपव्याप्यवृत्तित्वदृष्टमेव्याप्यवृत्तित्वसाध्यकसद्धेतुत्वेन संग्रहो दुर्लक्षणस्यासत्वेन न तेषु नादृष्टस्य । विषयतासंबंधेनादृष्टा
सानव्याप्तेः केवलान्वयित्वादिति दूषणमनवकाशमित्याहुः । अन्ये तु व्याप्यवृत्तित्वमतो कपिसंयोगाभावसाध्यकगुणत्वादेः संग्रह
धारणाय संबंधघटकभेदप्रतियोगितायां केवलान्वयिधर्मानवच्छिन्नत्वस्याधिकरणे निरवच्छिन्नवृत्तिकत्वाभेदेन निवेश्यं एवं मते गुणभे
देन निरवच्छिन्नवृत्तिकत्वमिति ।। एतेनानवच्छिन्नवृत्तिकान्यभाववत्साध्यकत्वेनिमित्तहेतुसामान्येऽव्याप्तिरिति कपिसंयोगाभावसाध्य
कनियमोपपादनः । तथापि जन्यत्वानादिसाध्यके उक्तदोषो न । परे तु स्वसमानाधिकरणाभावप्रतियोगिसाध्यकसद्धेतावित्यर्थः ।।
स्वं हेतुः । अभावो भावभिन्नः । स्वसामानाधिकरण्येन कीदृशानवच्छिन्नत्वं देयं यद्वा निरवच्छिन्नवृत्तिकान्यसाध्यसमानाधिकरण
सद्धेतावित्यर्थः । तेन गगनादिसाध्यके न दोषः । जन्यत्वानां साध्यकधारणं प्राग्वदित्याहुः । तन्न । एतद्रूपवान्यपृथिवीत्वादित्यादावव्या

ग॰टि॰पं॰ तिरस्कृतेन न्यूनतापत्तेन ग्रंथस्य कालभेदाविरोधात्। अत एव हाधिकरणसंयोगाद्योरन्यतरत्वेन साध्यतायां तद्घटकीभूतादित्वादौ
अव्याप्तिविरहेणासमीचीनगुरुत्वपक्षमेव वहवोत्ते च यंते। अत एव गुणवान्ज्ञानवत् परमाणुरूपादिवाशेषव्यासज्यवृत्त्यपि न पक्ष
निरस्तानीति दिक्। दीधितावव्याप्तिरिति। ननु गुरुधर्मावच्छिन्नसाध्यके साध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्याऽव्याप्ति
वारणाय साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावः साध्याभावपदेन विवक्षणीयः। व्यापकत्वं च प्रतियोगिवैयधिक
रण्यापादितामिति न कपिसंयोगत्वावच्छिन्नाभावसंग्रहः। किं तु द्रव्यत्वत्वावच्छिन्नाभावस्य एवेति नाव्याप्तिरिति चेन्न। गुरोरप
प्रतियोगितावच्छेदकत्वोपगमेनेतादृशविवक्षायाः निष्प्रयोजनकत्वेनाव्याप्तिसंगतेः। गुरोः प्रतियोगितानवच्छेदकत्वोप
गमेऽपि नैतादृशविवक्षणमावश्यकं। गुरुधर्मावच्छिन्नसाध्यकहेतौ केवलान्वयिसाध्यकत्वाक्रांततया तत्राव्याप्तेर्दीयमानत्वेन ग
द्वारणानपेक्षणात्। न च गुरुधर्माश्रयस्य कथं केवलान्वयित्वमिति वाच्यं। हेत्वावच्छेदकसंबंधानुयोगिनि साभावप्रतियोगि
तानवच्छेदकत्वस्य गुरुधर्मसाधारण्यात्। अत एव गुरोः प्रतियोगितानवच्छेदकत्वमवलंब्य साध्याभावपदेनोक्ताभावविव
क्षा। तथापि साध्यतावच्छेदकसंबंधेनैव साध्यव्यापकताविवक्षणेन कपिसंयोगाद्यव्याप्यवृत्तिसाध्यकाव्याप्तिपरिहारेऽपि प्र ॥६॥

तियोगि वैय्यधिकरण्यप्रवेशासत्वेन संयोगेन द्रव्याव्याप्यवृत्तिमावपक्षे संयोगेन साध्यतावच्छेदकेन संबंधेन साध्यव्यापकत्वाप्रसिद्धिः ॥ न च कारणा
यप्रतियोगिवैय्यधिकरण्यपदं हि न व्यापकत्वाविशेषणं किंतु कपिसंयोगादिसाध्यकाव्याप्तिः। तादृशसाध्यव्यापकतावच्छेदकरूपावच्छिन्न यत्किंचित्सा
ध्याभाववान्नवेत्तो तु कपिसंयोगी द्रव्यत्वादित्यादौ तादृशद्रव्यमात्रसत्वेनाभावमादाय नातिव्याप्तिरिति तात्पर्येण दीधितिकृतोऽव्याप्तिकथनं तु शुक्तमेव न चैव
मु संबंधावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा व्यापकत्वरूपावच्छिन्नप्रतियोगितायां निवेशेनाव्याप्यवृत्तिसाध्यके नाव्याप्ति
रिति वाच्यं ॥ सकलेन दोषाधारतानवच्छेदकत्वस्यावेदनीयत्वात् ॥ अत्र साध्याभावविशिष्टव्याप्यवृत्तितानिरूपकत्वानिवेशेन कपिसंयोगादिसाध्य
काव्याप्तिनिरासेपि संयोगिभिन्नमेयत्वादित्यादौ साध्याभावे कपिसंयोगेति शिष्टे वा व्याप्यवृत्तित्वासत्वेनाव्याप्तिर्दुष्परिहरा। एतादृशानर्थभि
याऽवच्छेदकावच्छेदेनाव्याप्यवृत्तेयोनभट्टाचार्येण दर्शितः। नन्वेतल्लक्षणपंचकस्य भिन्नपुरुषकर्तृकत्वाद वतारणदर्शनं धा दीधिति
कृतामसंगतं। एककर्तृकत्वे च मदवेक्षणादितिचेत्सत्यं। दीधितिकृतावतारणं न दर्शनं किंतु मणिकृता साध्यवदन्यावृत्तित्वमित्याशंक्यापि
नत्कृतामिदं शंका स्यात्। तामपनिनीषुमेधुरेण समापयेदिति न्यायमनुसृत्य मधुरत्वं पंचलक्षणस्य प्रदर्शितं तु लक्षणपंचमनुह र वस्याते
यन्नत्वं दर्शितमिति। कालेति। वह्निमान्धूमादित्यादौ उत्पत्तिकालीनावच्छेदेन वह्न्यभावस्य हेतावधिकरणपर्यन्तादौ सत्वादिरूपपि बोध्यं ॥

कर्मधारयेणेति। ननु स्वमपेक्ष्य लाघवं अधिकरणभेदेनाभावभेदमतानाश्रयणं चेत् लाघवः। अभेदेति। एतच्चानुगतधर्मस्य प्रतियोगिताऽवच्छेद
कत्वमङ्गीकृत्य। तेन साध्यवद्भिन्नवृत्तितात्पर्ये हेतुघटितेऽपि न क्षतिः। वैयर्थ्यापत्तेरिति। प्रकृतलक्षणघटकस्येति व्याख्यातम्। ननु पूर्वपद
स्थाने सर्वत्रापि पदयोर्व्यत्यासे। तेन प्रकृतस्य समभिव्याहारेऽपि न दोषः। न च साध्याभावानां निर्वेशेऽपि न यथासन्निवेशोऽस्त्विति वाच्यं। प्रा
चां गुरोरिवाव्यावर्तकस्य सर्वमते स्वभावतएवानवच्छेदकत्वात्।। योगतः साध्याभावघटितस्यैव वाऽव्यभिचारितत्वेनाद्बोध्यत्व [illegible] सं
भवात्। ननु हेतिमत्त्वमनन्तर्घ्यतानिकेचित्।। भावदेत्। विद्गणोति। मेत्समानार्थकेवाक्यरूपविवरणे कृ हेतोरर्थत्वघटकत्वाने
अन्यत्वरूपाद्वितीयार्थान्वयः। साध्यवदिति। उपलक्षणस्याप्यवच्छेदकत्वात्। साध्यवद्धीयवृत्तित्वान्निरुक्तलक्षणअवच्छेद
कतानिरूपकसाध्याभावनिष्ठावच्छेदकतानिरूपकधर्मिनिष्ठावच्छेदकताघटितावच्छेदकताकाभावस्य लक्षणत्वं। तत्र सा
ध्यवद्भिन्नत्वेनाविशेषितधर्मिनिर्देशात्साध्यवद्धीयवृत्तित्वविशिष्टसंबंधिनिरुक्तलक्षणावच्छेदकताघटितप्रतियोगिताऽवच्छे
दकताकाभावादेर्लक्षणमिति। मतद्वयं। अन्यथाऽव्याप्यवृत्तिसाध्यकाव्याप्तिभादवस्थ्येन। साध्यवद्भिन्नवृत्तित्वे वैयर्थ्यात्
अव्याप्यवृत्तीति विरत्यथमध्यात्वेनभेदाभिमानस्य अव्याप्यवृत्तिप्रतियोगिकानां भावाभिन्नानामेवाऽनेन द्रव्यत्वादेरपि कृ ।।३३।।
त्स्नत्वे घटे घटत्वसामानाधिकरण्यं न पटेद्रत्यादि।

र्थांतरं हि विरुद्धधर्माध्याससंभवेपि न भेदः। विरुद्धधर्माध्यासेन विरुद्धधर्मद्वयप्रतीत्योः प्रमात्वानुरोधेन व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोर्वि
रोधस्याग्रे वक्ष्यमाणत्वात् हि रोधं निरस्यति। अत एवेति। व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादीनामेव भेदकत्वस्य स्वीकरणकृते संमतत्वादित्य
र्थः। ननु ह्रदत्वसामानाधिकरण्यमहद्व्याधिकरण्यादीनामप्यभावभेदकत्वं लक्षणकर्तृसंमतं। अत एवाग्रे दीधितौ आवश्यकत्वेन
सिद्धेरिति वक्ष्यति। अन्यथाऽव्याप्यवृत्त्यभाव एवेति। कृत्यादिरिति। आवश्यकत्वेन मात्रस्येवाधिकरणभेदात् इदमनुसरत्य साध्यपदवैय
र्थ्यमिति हृदि। अथवेति। अत एव यथा सत्वभावत्वेनासिद्धेरिति मात्रे स्यात्। साध्याभावपदं साध्याभावे तत्र साध्यपदं। अनुयोगि
नेति। संबंधसाधारण्यानुयोगितामवच्छेदसाध्यवदवृत्तित्वं हि प्रतियोगिकसमवायवृत्तिधर्मस्य वृत्तेरव्याप्तिरतो विशेषपदं
भावविभक्तत्वपरमनुयोगितानिवेशे घटत्वाभावादिसाध्यकाव्याप्ते विलक्षणेति। भावाभावसाधारणाभावत्वस्वरूपसंबंधव्यावर्तनोदेश्य
र्थः। नादृशावृत्तेर्लक्षणसंबंधेनान्यत्र साध्यीयत्वा। स्वाभावादेव नाप्रसंगः। एतेन भावाभावसाधारणा अवच्छेदकत्वे अव्याप्तिर्निरस्ता
समभपदार्थमात्रवृत्तिनि वेशे भावसाध्यकाव्याप्तेरात्ति निरस्तं। प्रमेयत्वादिति। न चात्र साध्यवदवृत्तित्वमिति। स्वसंबंधसामा
न्येन यत्किंचित्संबंधेन वा। तथा सति कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगाभावस्य कालिकादिसंबंधेन साध्यवदवृत्ति

ा॰ दी॰ पं॰

गुणादिव्यक्तिमत्याऽव्याप्तेः॥ नापि विशेषणताविशेषसंबंधेनाभावसाध्यकाव्याप्तेः। अपितु साध्यवत्तायत्किंचिद्विरोधितानिरूपकसं
बंधेन। तथा च प्रमेयत्वादिकमादाय कथमव्याप्तिः। एतत्केनेऽभावमात्रभेदस्य गगनाभावादिकमादायापि न संनिवाप्यं॥ अत्रैव
प्रकारकप्रमाविशेष्यत्वाभाववान् घटादित्यादानव्याप्तेः। केचित्तु उक्तव्याघवादिना साध्यवद्भिन्नव्याप्तौ साध्याभाववान्ध्येति कर्मधार
य एवाधुक्तः। साध्यवत्त्वं च स्वप्रतियोगिकत्वसामानाधिकरण्योभयसंबंधेन। एवं च प्रतियोगितायाः साध्यतावच्छेदकधर्मावच्छिन्न
त्वं साध्यतावच्छेदकसंबंधावच्छिन्नत्वं चेत्युभयमपि निवेशनीयं। एवं च साध्यवद्भिन्नाभावाप्रसिद्ध्येव केवलान्वयिन्यभावादिति मत्वा संग
तिः। ननु साध्यतावच्छेदकीभूतधर्मसंबंधावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेरिति। घटत्वाभाववारणाय साध्योपादानं। न चैवं सा
ध्यपदस्यार्थक्याय स्वप्रतियोगिकत्वनिवेशे प्रयोजनाभाव इति न्याय प्रासः। सामानाधिकरण्यस्य एव तत्र नियामकतया महिम्नैवानु
योगिताविशेषस्यैव संबंधतया स्वप्रतियोगिकत्वस्य निवेश्यत्वात्। तावन्मात्रोपादाने च साध्यवद्भिन्नसाध्याभावाप्रसिद्धिरतः सा
मानाधिकरण्यमुपात्तं। वस्तुतस्तु स्वसामानाधिकरण्यमात्रं संबंधः। न तु स्वप्रतियोगिकत्वमपि वैयर्थ्यात्। साध्यपदोपा
दानं च तत्संबंधलाभार्थमेवेति। एवं च तत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं नदर्थः। तेनाविरोध इति नाव्याप्तिनेरि ॥६२॥

स्वं साध्यं।

सा हेतौ नास्ति व्याप्तिः। साध्यादिवारणायाभाववत्पदं। एवं चात्राभाववत्त्वमभेदप्रमादरूपं निरर्थकमेव। तथा व्याप्यत्वाभिमतसाध्यके उक्तसंबंधेन साध्यवतोह
व्यवत्तिसंयोगाभावादन्यत्वं साध्याभावः। एवं कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाकाभावाभाववत्त्वात्मत्वादिसाहेतौ भादृशानिरू
पकैस्तादात्म्याभावादन्य एवास्ति व्यावृत्तिः। साध्याभाववदिति लक्षणसमन्वयो वाच्यः। एवं च कालिकसंबंधावच्छिन्नमंदृशितावाः साध्या
भाववत्तोपगमोप्यनावश्यकः प्रतियोग्यं। नन्वत्रापि प्रथमे गुणासमवेताभावं द्वितीये जन्यत्वस्य भावं चादाय लक्षणसमन्वयसंभवा
त्। यत्तु सर्वत्र गगनवृत्तितोभयाभावं व्यधिकरणसंबंधेन साध्याभावं च विपक्षमादाय तिमादायनाव्याप्त्यान्व्याप्तौ। अधिकरणभे
देनाभावभेदात्स्वभेदः इति तल्लक्षणं किमर्थमिति एवम्ः। अभावभेदेन मेस्वर्वत्वे वसाध्यसामान्याभावादिकमादाय लक्षणसमू
न्वयसंभवाच्च। कालिकसंबंधवारणाय साध्याभावाधिकरणत्वं साध्यसामानाधिकरण्यघटकरूपेत्वंत्याभावीयविशेषणसंबंधे
न निवेश्यं। एतदर्थमेव चाभावपदं। तदुक्तं साध्याभाववत्त्वं साध्यतावच्छेदकसंबंधेन। अभावसाध्यके च विपक्षाद्यभावः। साध्यव
त्वप्रकारकप्रमाभाववत्त्वं वा लक्षणघटकः साध्यवत्ताग्रहविरोधि मानियामकसंबंधेन मकिंचित्रौ तु मादृशाकाकाभावाभावसाध्य
के व्याप्तिः। साध्यवत्तानेन संबंधेन द्रव्यत्वमप्रसिद्धेः। एवं च घटत्वघटत्वाकातासंयोगान्यतमत्वाभावसाध्यके घटकात्रा संयोगात्मकसाध्य

टी॰ पं॰

भावमादाय व्याप्तिर्न्निरुक्ता घटत्वादिरूपसाध्याभावस्य निरूपकसंबंधेन साध्यवद्वृत्तित्वाविशेषणतयाऽधिकरणाप्रसिद्धावपि घटत्वाभावमा
दायैव लक्षणसंगमे इत्याहुः। अन्ये तु स्वप्रतियोगिकत्वस्वसामानाधिकरण्योभयसंबंधेन साध्यवद्वृत्तित्वं न युक्तं। सामानाधिकरण्येय
द्वृत्तित्वं येन केनचित्संबंधेन तद्वद्भावस्य कालिकादिसंबंधेन साध्यवद्वृत्तित्वादव्याप्तेः। यदि स्वप्रतियोगितावच्छेदकविरोधितानिरू
पकसंबंधेन तदा कालिकसंबंधावच्छिन्नाकाशाभावाभाववसाध्यके तथाविधकालिकसंबंधेन साध्यवद्वृत्तित्वाप्रसिद्धेरव्याप्तेः॥ यदि
विशेषणतासंबंधेन तद्व्यत्वं पर्वतत्वादिकमादाय व्याप्तिवारणाय साध्यपदार्थकतया स्वप्रतियोगिकत्ववैयर्थ्यम्॥ गगनाकाशा
भावाभाववसाध्यके आकाशाभावस्य साध्याभावच्छेदकसंबंधेन साध्यवति देशिविशेषणतया वृत्तित्वेपि साध्यप्रतियोगिकत्वात् आत्म
वृत्तित्वावच्छिन्नाभावमादाय लक्षणसंगमे स्वत्वान्नस्य प्रतियोगिकत्वं साध्यमेवेति वाच्यं॥ तथापि [illegible] पर्वतादेरपभावं न्यायवे
न पर्वतत्वात्मकं साध्यप्रतियोगिकमादाय प्रसिद्धानुमानाव्याप्तेः। एतादृशप्रतीत्या दृढे गौरवाच्च। वस्तुतस्तु महानसीयवह्न्यभावस्य
कथं व्यावृत्तिः। यादृशसाध्यप्रतियोगिकत्वं। तादृशसाध्यवद्वृत्तित्वं। यादृशसाध्यवद्वृत्तित्वं न तादृशसाध्यप्रतियोगिकत्वमित्युभ
यसंबंधेन साध्यवद्वृत्तित्वान्। यदि च साध्यतावच्छेदकविशिष्टः पर्वतं मत्वा न वैरस्यं। वैशिष्ट्यं च स्वाश्रयप्रतियोगिकत्वं स्वाश्रयव ॥४२॥

वृत्तित्वोभयसंबंधेन तदा साध्यतावच्छेदकवद्वेद घटितत्वस्य साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वरूपस्य कोकलक्षणपरिष्कारत्वात्संभवा
दीधितिकृतां तदनाशयमित्याहुः। परे तु कृ युक्तिभ्यां साध्यवद्भिन्नश्चासौ साध्याभाववांश्चेत्येवं कर्मधारयः। साध्यवद्भिन्नत्वं च
प्रतियोगिमद्भिन्नत्वं न च घटत्वकपिसंयोगान्यतराभाववान्नात्मत्वादिसाध्यकपिसंयोगरूपसाध्याभाववदधिकरणे आत्मनि गुणसा
मान्याभाववत्वरूपप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य सत्वादव्याप्तिरिति वाच्यं॥ यादृशप्रतियोगितावच्छेदकावच्छिन्नान
धिकरणं साध्यतावच्छेदकावच्छिन्नतादृशप्रतियोगिताकाभावाधिकरणमिति विवक्षितत्वात्। तादृशाभावो भयाभावादिवारणाय
साध्यतावच्छेदकावच्छिन्नत्वं निवेशः। साध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकभेदवत्त्व
मित्यर्थः। तथा च साध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकभेदघटितपंचमावतारेऽतिव्याप्तिरित्याहुः। महानसीयेति॥
महानसीयत्वविशिष्टवह्नित्वं तद्वद्भिन्नाभाववत्वरूपस्याव्यवच्छेदकतापर्याप्त्युपादानेऽपि कथं तानवकाशः। द्वितीयलक्षणानुरोधे
न तु हृदादिनिवेशः। एवमग्रेऽपि साध्यतावच्छेदकानतिरिक्तवृत्तित्वस्य व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताप्रवेशः। भावमात्रभेद
मतेनेदाह। पृथिवीत्वेति। अन्यतरत्वावच्छिन्नाभावस्य पृथिवीत्वरूपसाध्याभाववृत्तित्वाभावेनाव्याप्तिः। अभावभेदमतेनाह। कालि

केति ॥ ननु समवायावच्छिन्नप्रतियोगिताके कालिकसंबंधावच्छिन्नप्रतियोगिताकेवाद्रव्यत्वाभावे साध्ये कथम् व्याप्तिः । साध्यतावच्छेदकसं
बंधेन साध्यवत्ताग्रहविरोधिता नियामकसंबंधेन साध्याभाववत्त्वस्यैवाव्यतया साध्यतावच्छेदकीभूतं कालिकसंबंधेन साध्यवत्ताबुद्धि
प्रतिबंधकसंबंधावच्छिन्नसाध्याभाववत्त्वस्य स्वरूपसंबंधेन वत्तास्तानस्य च विरोधितया द्रव्यत्वस्य तेन संबंधेन वृत्तावसंभावितया साध्यतावच्छे
क संबंधा दै[illegible]वच्छिन्नसाध्याभावस्यैव लक्षणघटकत्वात् । द्वितीयलक्षणे च स्कभूतं तत्र साध्यतावच्छेदकसंबंधेन साध्यवत्ताग्रहविरोधितानियाम
कसंबंधेन साध्यवद्वृत्तित्वस्यानिवेशनीयत्वात् । न च प्रतियोगितामेयग्रहविरोधितानियामकसंबंधेन तदुभयनिवेशे व्याप्तिः
संगमनीया । तथा सति कपिसंयोगाभाववत्त्वपः कालिकसंबंधावच्छिन्नाभावस्यापि प्रतियोगितया प्रतियोगिमत्ताग्रहविरोधितानि
यामके कालिकसंबंधमादाय व्याप्यवृत्तिसाध्यकाव्याप्तेः । प्रतियोगितावच्छेदकसंबंधेन साध्यवत्ताग्रहविरोधितानियामकसंबंधे
[illegible]न तदुभयनिवेशापत्तेः तत्संगतिरिति चेत् न । तथा सति स्वप्रतियोगितावच्छेदकसंबंधेन साध्यवत्त्वघटितसाध्यवद्वृत्तित्व
स्य धर्मवान्तसमकालीनवद्वृत्तितादात्म्यसंबंधसामान्येन साध्यवद्वृत्ते हेतुमत्यपि धर्मकालीनसाध्याभावसत्त्वादिति व्याप्तिचार
तापावतरणपान्वंद्यपतया साध्यवद्वृत्तेभोपः साध्याभाववन्निति कर्मधारयोपेक्षायाः निर्बीजत्वापातात् । प्रतियोगितावच्छे ॥६४॥

ह्रदीभिन्ने समवायेन वह्निमद्भिन्नत्वेऽपि समवायसंबंधावच्छिन्नवह्न्यभावस्य वारणाय साध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभाववत्साधर्म्यसंभ
वादिति चेन्न । द्रव्यत्वाभाववान् द्रव्यत्वप्रकारकप्रमाविशेष्यत्वाभाववत्त्वविवक्षितत्वात् । एवं च साध्यवद्भिन्न इत्यत्र घटकसाध्यवत्त्वमपि सा
ध्यतावच्छेदकसंबंधेन वाच्यमिति न कर्मधारयापेक्षा निर्विवादेति । ननु कपिसंयोगी एतत्त्वादित्यादौ द्रव्यत्वं कपिसंयोगाभाववत्
साध्यवद्भिन्ने कालिकादिसंबंधेन वृत्तित्वादव्याप्तिः । दैशिकविशेषणतया नहि तन्निवेशे च घटत्वसाभावादौ कालिकसंबंधावच्छिन्नप्रतियो
गिताकात्यन्ताभावादौ च साध्ये आत्मत्वादावव्याप्तिः । प्रतियोगिमत्तायद्धविरोधितानियामकसंबंधेन भानिवेशे च कपिसंयोगादिसा
ध्यके कालिकसंबंधेन कालिकसंबंधावच्छिन्नप्रतियोगिताकवत्त्ववृत्तेः कपिसंयोगाभावाभावरूपप्रतियोगिमत्तायद्धविरोधितानि
यामकत्वसत्त्वादव्याप्तिरिति चेन्न । साध्यतावच्छेदकसंबंधेन साध्यवत्तायद्धविरोधितानियामकसंबंधेन तन्निवेशस्यात् । ननु साध्यव
द्भिन्नवृत्तित्वनिवेशापेक्षया साध्याभाववत्पदसार्थक्यार्थं अभाववत्त्वविलक्षणानुयोगिताभावार्थमित्यत्र । न द्रव्येत्वसाध्यवद्भिन्नवृ
त्तित्वस्य प्रतियोग्यनधिकरणवृत्तित्वरूपव्याप्तेः ख्यानमेवोचितम् । वस्तुतस्तु प्रतियोग्यनधिकरणत्वस्य साध्याभावाधिकरणत्वे न देवो
चितनानिवेशनामिति चेन्नैवं । विरुद्धस्थलेऽयं यथाक्रमं एवं भट्टाचार्यैः समाधास्यमानत्वात् । गगनाभावस्याधिकरणभेदेनाभिन्नत्वपक्षे नदे

प्र॰टी॰पं॰ स्य पक्षे आत्मादीनां साध्याभाववत्त्वानिरूपितानधिकरणत्वे वा आह। घटत्वाभाववेति। साध्येऽत्रेत्यादि साध्यतावच्छेदकधर्मसंबंधावच्छिन्नप्रकार
ताघटितत्वधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतस्वनिष्ठप्रकारतावच्छेदकसंबंधेनेत्यर्थः। कालिकसंबंधावच्छिन्न
घटत्वाभाव समवायसंबंधावच्छिन्नघटत्वाभावान्यतरवान् घटत्वादित्यादौ विशेषणतया कालिकसंबंधावच्छिन्नघटत्वाभाववद्ग्रहं प्रति
कालिकसंबंधेन घटत्ववद्ग्रहस्य प्रतिबंधकतया तेन संबंधेन घटत्वस्वरूपसाध्याभाववति पटत्वादिरूपहेतुसत्त्वादव्याप्तिः। न च घटत्वस्य
स्वपदेन धर्तुं शक्यतया साध्यतावच्छेदकधर्मसंबंधावच्छिन्नाभावत्वाभावादिति वाच्यं॥ तथापि कालिकसंबंधावच्छिन्नप्रतियोगि
ताकात्मत्वाभाववत्साध्यके समवायेनात्मत्वग्रहस्य समवायावच्छिन्नात्मत्वाभाववत्त्वेन साध्यग्रहप्रतिबंधकतयाऽव्याप्तिरिति चेन्नः सा
ध्यतावच्छेदकधर्मनिवेशात्। साध्यतावच्छेदकसंबंधावच्छिन्नेत्यनुक्त्वा यत्किंचित्संबंधेन साध्यवत्ताग्रहं प्रतीत्युक्तौ कालिकसंबं
धावच्छिन्नद्रव्यत्वाभावे कालिकसंबंधेन साध्येऽव्याप्तिः। स्वरूपसंबंधेन साध्यवत्ताग्रहं प्रति स्वरूपसंबंधावच्छिन्नप्रतियोगिता
कसाध्याभावस्य द्रव्यत्वस्वरूपेण वा कालिकसंबंधेन तद्वत्ताज्ञानस्यापि प्रतिबंधकतया कालिकसंबंधस्यापि तथात्वापत्त्या कालिकस्यापि त ॥१९
त्संबंधेन साध्याभावाधिकरणत्वात्। एवमतः साध्यतावच्छेदकसंबंधेनेत्युक्तं। न च संयोगीत्यत्र वृक्षत्वादौ द्रव्यत्वादिति संयोगाभाव

विशेषस्यैव कालिकसंबंधेन साध्यवद्भिन्नगुणादिवृत्तित्वादव्याप्तिरतः साध्यवद्भिन्नवृत्तित्वमपि साध्यतावच्छेदकसंबंधेन साध्यवत्ताग्र
हाविरोधितानियामकसंबंधेन वाच्यं [illegible] एवं च साध्यवत्ताग्रहाविरोधितानियामकीभूतं यादृशसंबंधेनाभावस्य साध्यवद्भिन्नवृत्तित्वं तथावि
धाभावदृशसंबंधेन साध्याभाववत्त्वमिति। संबंधैक्यविवक्षणादुक्तस्थले साध्याभाववदधिकरणतावच्छेदकीभूत कालिकसंबंधस्य साध्यव
द्भिन्नवृत्तितावच्छेदकसंबंधत्वासंभवात् स्वरूपसंबंधस्यैव तादृशवृत्तित्वेन संबंधेन साध्याभावाधिकरणमात्मेति नाव्याप्तिरिति। साध्यताव
च्छेदकसंबंधेनेति व्यर्थमेवेति। वाच्यं॥ तथापि कालिकसंबंधावच्छिन्नाकाशाभावाभावादौ साध्ये आत्मत्वादौ तदव्याप्तेः। कालिकसंबंधेनोक्त
साध्यवत्ताज्ञानं प्रति कालिकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावस्य स्वरूपसंबंधेन वत्ताग्रहस्य प्रतिबंधकतया स्वरूपसंबंधस्यापि
तथात्वापत्तेस्तत्संबंधेनाकाशाभावरूपसाध्याभाववत्त्वस्यात्मन्यपि सत्त्वादिति साध्यतावच्छेदकसंबंधेनेत्यस्यावश्यकत्वात्। न च साध्यवद्
भिन्नत्वेनैव गगनाभावाद्यन्यत्वे गोत्वादिर्यत्र गगनाभाववृत्तिना व्याप्तिरिति वाच्यं। [illegible] तथापि महाकालानुयोगिककालिकसंबंधेन का
लिकसंबंधावच्छिन्नप्रमेयसामान्याभावे साध्ये महाकाले तदव्याप्तेः। स्वरूपसंबंधेन साध्यवत्ताग्रहं प्रति कालिकसंबंधेन स्वरूपसं
बंधावच्छिन्नप्रतियोगिताकसाध्याभावग्रहस्याविरोधितया कालिकसंबंधस्य साध्यतावच्छेदकीभूतत्वमहाकालानुयोगिककालिकसंबंधे

ग॰ टी॰ पं॰ न साध्यवद्भिन्नत्वं कालत्वमिति साध्याभाववद्वृत्तित्वस्य संभवात्। तेन संबंधेन साध्याभावाधिकरणत्वस्य कालत्वे सत्त्वादिति मतं दूषकत्वाम्। यदि
च स्वप्रकारकनिश्चयप्रति स्वपदस्य साध्याभावपरत्वान्न चापि साध्याभाववदवच्छेदकसंबंधावच्छिन्नसाध्याभाववच्छेदकावच्छिन्नप्रतियोगिताकत्वेन
स्वप्रकारकनिश्चयं प्रत्यर्थनेतत्त्वव्यर्थमेव साध्यतावच्छेदकसंबंधेनैव वक्तव्यं। घटत्वाभाववान्घटत्वादित्यादौ कालिकसंबंधावच्छिन्नघट
त्वाभावस्य समवायसंबंधावच्छिन्नघटत्वाभावोभयवत्ताग्रहं प्रति कालिकसंबंधेन घटत्वग्रहस्य समवायावच्छिन्नघटत्वाभावग्रहं प्रति च कालि
कसंबंधेन समवायेन च घटत्वस्य समुदितस्य च प्रतिबंधकत्वादव्याप्तिरतः प्रतिबध्यताप्रतिबंधकतावच्छेदकत्वयोर्निवेशः। घटभिन्नं
घटत्वाभाववदित्यादौ तादृशाभावस्य संबंधेन घटत्वरूपसाध्याभाववति घटत्वे हेतुसत्त्वादव्याप्तिरतः स्वनिष्ठनिवेशः। अथैवमपि काले
कसंबंधेन वह्न्यभाववान् वह्न्यभाववान् अयं च वह्न्यभाववानिति कालिकसंबंधेन स्वप्रकारकग्रहस्य प्रतिबंधकतया कालिकसंबंधसंग्रहो
दुर्वारः। न च निश्चयोपादाने स्वरस्यात् स्वप्रकारकनिश्चयत्वं प्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणमिति विवक्षायां न दोषः। धर्मिता
वच्छेदकविषयतानभावेनैवपर्याप्तेः। न च किंचिद्धर्मावच्छिन्नधर्मिकस्वप्रकारकनिश्चयत्वनिवेशोऽपि नानिस्तारः। ह्रदो वह्न्यभाववान्घटो व ॥१६॥
ह्न्यभाववानिति निश्चयानां व्याप्तिस्वावच्छिन्नप्रकारतानिरूपितधर्मिताभावत्वावच्छिन्नप्रकारतानिरूपितावच्छिन्नविशेष्यकनिश्चयत्वे

नैवं प्रतिबंधकतया नीरूपस्य प्रकारक निश्चयत्वे पर्याप्त्यभावात्। मैवं साध्यमिनावच्छेदक निश्चयवृत्तिस्वप्रकारताया मनतिरिक्तवृत्तित्वरूपमव-
च्छेदकत्वं निवेश्यं। निश्चयत्वमनुपादाय वा स्वप्रकारतायासानवैशिष्ट्यानवच्छिन्न प्रतिबंधकताया स्वरूपसंबंधरूपमवच्छेदकत्वं निवेशनीयं प्रति-
बंधकताविशेषणाभावेपि निश्चयत्वोत्कीर्तनं नेमितिः। वस्तुतस्तु स्वनिरूपित प्रतिबंधकताव्याप्यसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यवत्ता-
निश्चयत्वाश्रययद्रूपप्रतिबंधकत्वं निश्चयपदोपसं[?]हानलभ्यं। एवं साध्यतावच्छेदकसंबंधानुपादाने संगतिः। समानधर्मिकत्वानुपस्थापनं
मिमादिनि अव्याप्तिमाशंक्य यादिश्रुतिमिमे रव्याप्तिसंतापो मरकाश्रीन कुथनकालिस्थस्तत्राव्याप्तिरा हेत्वन्तु ऽव्याप्तिमाशंक्य हेतुकं
मत्रसाध्यतावच्छेदकसंबंधेन संयोगवत्तासानवृत्तिनिरवच्छिन्नविशेषणतासंबंधेन संयोगाभाववत्तानां प्रतिबंधकमितिमते नाव्याप्तिः गु-
णादेरवच्छेदेन संबंधेन साध्याभाववत्त्वात्। अपितु अव्याप्यवृत्तिसाध्यकस्थले जकमतेतु स्वरूपसंबंधेन संयोगाभाववत्तानां प्रतिबंधकतया नः-
मतेवी अव्याप्तिरित्याशंका बीजमनंकोटिद्वयं क्रमेण शंकासमाधानाभ्यां दर्शयति नचेति।। नथाच निरवच्छिन्नविशेषणतेन वमादरीर्थाभिप्रा-
प्रायः। अत्र निरवच्छिन्न विशेषणतासंबंधावृत्तिताभाववत्त्वे साध्याभावत्वपदस्याव्याप्तिः। किंतु विशेषणतासंबंधावच्छिन्नाभाववत्त्व-
धावच्छेदकताकाश्रयवेना संयोगेत्यस्य त्कम इति मतं दर्शयति। केचित्तु इति। साध्याभावाभावानिरूपणेति।। साध्यनिरूपितेत्यर्थः। अभावप

ग॰टी॰ पं॰

देऽसंभवादनावारणापत्तेः। नोक्तानुपपत्तिः। नवरत्नाभावादिसाध्यकव्याप्तिः। हेतुतावच्छेदकसंबंधावच्छिन्नव्यक्तिस्थापनसिद्धिभयेन द्रव्यत्वोपेक्षा
सद्धेतुत्वार्थप्रमेयेति। घटाभावरूपेति। समवायसंबंधावच्छिन्नप्रमेयाभावस्य योविशेषणतासंबंधावच्छिन्नाभावस्तस्य प्रमेयमात्रस्वरूप
त्वेन कालिकसंबंधावच्छिन्नघटाभावरूपत्वमित्याशयेनेदं। यावत्साध्यनिरूपितेति। साध्यतावच्छेदकव्यापकानुयोगितानिरूपितेत्य
र्थः। तेन नैकव्यक्तिसाध्यके यावत्त्वाप्रसिद्धिः। स्वरूपेति। एकैकसमवेतस्वरूपत्वे सकलसमवेतस्वरूपत्वे तु महागौरवं। यत्किंचित्त्वे यावत्त्वानव
कास्फोरकं। कालिकसंबंधावच्छिन्नप्रमेयाभावस्य दैशिकसंबंधेनाभावोपि प्रमेयत्वेन साध्य इति। नादर्शने दैशिकसंबंधेन साध्य
वद्भिन्नवृत्तेः साध्याभावस्याप्रसिद्धेः कालिकसंबंधेनाधिकरणमादाय व्याप्तेरिष्टत्वात् परत्वदा। ननु तथापि महाकालानुयोगिक
विशेषणतासंबंधेन प्रमेयस्य साध्यत्वे महाकालस्याहेतुत्वादव्याप्तिः। साध्यतावच्छेदकसंबंधावच्छिन्नप्रमेयाभावस्य यः स्वका
लिकसंबंधावच्छिन्नाभावस्तस्य प्रमेयत्वेन साध्यत्वे महाकालानुयोगिककालिकसंबंधेन वृत्तिमत्त्वाभावेन प्रतियोगितावच्छे
दकीभूतकालिकसंबंधेन साध्यवद्भिन्नवृत्तेः साध्याभावस्य महाकाले न तत्संबंधेन सत्त्वात्। एवं महाकालानुयोगिकका ॥२०॥

लिकसंबंधेन द्रव्यवृत्तिताविशिष्टाभावस्य साध्यत्वे यथा मुक्तहेतावव्याप्तिः निरुक्तसाध्यस्य यः । कुत्रापि कालिकसंबंधावच्छिन्नाभावः
न स्यापि द्रव्यवृत्तितेन साध्येन वा महाकालानुयोगिकस्य कालिकसंबंधेन वृत्तिमत्त्वाच्च तन्निरूपितप्रतियोगितावच्छेदकीभूतस्य कालि
कसंबंधस्य साध्यवृत्तित्वस्य खंडकालनिरूपितवृत्तितावच्छेदकत्वात् ... वैत्यनेन विशेषणरूपेण न संबंधत्वं । अन्यथा येन पदार्थस्य द्विधान
स्वरूपसाध्य वेशानुपपत्तिः । वह्निनिरूपितस्य प्रतियोगितावच्छेदकविशेषणताविशेषणाकाशाभावादेः पर्वतीयादृष्टस्य वह्निमान् धूमादित्यादा
वव्याप्त्यभावेन साध्याभावे व्यर्थस्य कवलादित्यर्थः । तथापि स्वरूपसंबंधेन द्रव्यवृत्तिताविशिष्टाभावे साध्ये द्रव्यत्वादावव्याप्तिः । सा
ध्यतावच्छेदकधर्मसंबंधावच्छिन्नाभावस्य यः कालिकसंबंधावच्छिन्नाभावस्तस्यापि नित्यद्रव्यवृत्तितेन द्रव्यवृत्तिताविशिष्टाभावस्या
कालेन तथा साध्यरूपत्वेन प्रतियोगितावच्छेदकीभूत कालिकसंबंधेन साध्यवद्भिन्नस्य कालादिवृत्तिसाध्याभाववत्तिरजन्यद्रव्ये हेतोस्स
त्त्वात् । एवं विषयतासंबंधेन प्रमेयस्य साध्यत्वे ज्ञानत्वादावव्याप्तिः । विषयतासंबंधावच्छिन्नप्रमेयाभावस्य यः कालिकसंबंधावच्छिन्ना
भावस्तस्य प्रमेयत्वेन साध्यतया तन्निष्ठप्रतियोगितावच्छेदककालिकसंबंधेन साध्यवद्भिन्नवृत्तित्वस्य साध्याभावे महत्वस्य च जन्यज्ञाने
सत्त्वात् । साध्यतावच्छेदकव्यापकानुयोगिता निरूपितप्रतियोगितानिवेश्य मद्वारणसंभवेपि महाकाले वैयर्थ्ये समवायेन प्रमेय

न॰टी॰पं॰

सामान्यसाध्यके साध्याभाववदभाववत्त्वोपयेनस्वनारूपत्वमुपगम्य तथाविधानुयोगितापालिध्यावेरनात्॥ न च साध्यनिरूपितत्वं साध्य
यत्वावच्छिन्नत्वानुयोगिताकत्वं न च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतानुयोगिता निरू
पितत्वं तेनैतद्रूपादिसाध्यकेन दोषः। तथा च नवद्रव्यत्वं तिसाध्यव्यापकतावच्छेदकत्वस्यानित्यद्रव्यत्वप्रभावनिष्ठानुयोगितायाम
सत्त्वान्नाव्याप्तिः। एवं विषयतासंबंधेन प्रमेयसाध्यकव्यव्याप्तिवारणकृत्यं। अत एव समवायातिरिक्तप्रमेयस्य समवायेन साध्यत्वे
साध्याभाववदभावस्य स्वनारूपत्वेपि समवायित्वानुयोगितायाः एवं साध्यव्यापकतावच्छेदकत्वं न यामात्मनिरूपितप्रतियोगितावच्छेद
कीभूतः स्वरूपसंबंध एवेति नाव्याप्तिः। अन्यथा प्रतियोगितायाः साध्यनिरूपितत्वदौर्घट्यप्रसंगात् तथा च कालिकसंबंधावच्छि
न्नप्रतियोगिताकाकाशाभाववदभाववत्त्वान्नासत्त्वादिति स्वरूपसंबंधावच्छिन्नप्रतियोगिताकोत्यन्तानितावविशिष्टगगनाभाववदभाव
स्य साध्यत्वमनीयन न यासाध्यरूपत्वमेवेति कालव्याप्तितावविशिष्टगगनाभाववनिष्ठायाः साध्यनिरूपितप्रतियोगितायाविशेष्य
मात्रनिष्ठत्वेनावविशिष्टस्य पुरस्थादनातिरिक्तत्वाद्गगनाभाववनिष्ठत्वमितितदवच्छेदकस्वरूपसंबंधेन गगनाभावरूपसाध्या
भावस्याप्रसिद्धेरव्याप्तिः। साध्यव्यापकतावच्छेदकानुयोगिता निरूपितप्रतियोगितावच्छेदकसंबंधानवेशेपि संभवात्॥ ।

नचोक्तस्थले स्वरूपसंबंधस्य च कथं न घटकत्वेपि आधिकरणभेदेन गगनाभावस्वरूपसाध्याभावभेदोपगमान्न साध्यवद्भिन्नवृत्ति साध्याभावव
त्त्वमात्मनि नास्त्येवेति कथमव्याप्तिरिष्यत इति वाच्यं। गगनाभावभेदोपगमे स्वावच्छिन्नप्रतियोगिके तत्र स्वनिष्ठत्वं फलोपपत्तेः। कालिकसं
बंधावच्छिन्नप्रतियोगिताकाकाशाभावाभावस्य साध्यकेऽसत्त्वहेतौ आकाशाभावस्याधिकरणभेदेन भेदादेवाव्याप्त्यनवकाशात्। एवं घ
टाभिन्नत्वादिसाध्यके कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य घटत्वावच्छिन्नगगनाभावाभावस्य साध्यत्वमनीयन्न न यत्र व्याप्तियो
गिभावच्छेदकं कालिकसंबंधेन साध्याभाववति पटत्वादिहेतुसत्त्वेन व्याप्तेः। स्वाविष्टत्वस्याविरूपकत्वे पादुर्भेत्यादिग्रंथानुपपत्तिः। किं वा स
निष्ठत्वानुपादानेपि नादन्नाघटत्वविशिष्टघटत्वाभावस्य तथात्वेन कालिकसंबंधसंग्रहप्रसंगेन मतौ वाव्याप्तेर्दुर्वारत्वादित्येव। साध्य
वद्भिन्नमात्रवृत्तित्वस्य वाच्यत्वात्। नन्वेवं आदन्नाप्रतियोगिभावच्छेदकीभूतयत्संबंधेन साध्यवद्भिन्नवृत्तित्वं तेन संबंधेन साध्याभा
ववत्त्वं वा व्याप्तिरिति सर्वदोषवारणान्मात्रपदं व्यर्थमिति वाच्यं। विषयितासंबंधेन प्रमेयसाध्यके गगनत्वाद्यन्यतमत्वादि हेतावतिव्या
प्तेः। नन्वेवं कालिकसंबंधस्वरूपसंबंधयोरपि संग्रहसंभवात्ताभ्यां साध्याभाववदधिकरणे सामान्यभिन्ने अन्ये हेत्वोरसत्त्वात्। अथ मा
त्रार्थनिरर्थकीभावापेक्षया लाघवात् द्वाभ्यां संबंधेन लक्षणसमन्वयो आवश्यकत्वे तद्वत्तत्वेनोपादेयः। आत्माकाशान्यतमत्वादित्यादौ

ग॰टी॰पं॰ कालिकसंबंधेन साध्यवद्भिन्ने घटत्वाभावस्य न संबंधेनाधिकरणे हेतोरवृत्तेरिति व्याप्तिः प्रतियोगिभावच्छेदकांतमितिचेन्न । प्रमेयत्वा
भावगगनत्वान्यतरत्वादिवादौ उक्तरीत्यैव रीत्या विशेषणतासमवायेन प्रमेयाभावस्य यः कालिकसंबंधावच्छिन्नाभावस्तस्यापि प्रमेयत्वेन
साध्यतया तत्प्रतियोगितावच्छेदककालिकसंबंधमपाद्य व्याप्तिव्याप्तिप्रसंगात् तत्तदन्यप्रमेयसाध्यके हेतु । पूर्ववदिति ॥ ननु स्वकालिकसंबं
धावच्छिन्नप्रतियोगिताकात्यंतप्रकारकप्रमाविशेष्यत्वाभाववत्ताया समवायादिसंसर्गे कालिकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावस्यावि
शेषणतया योऽभावस्तस्यापि साध्यरूपतया तन्निरूपितप्रतियोगितावच्छेदकाभावविशेषणतासंबंधेनादाय प्रमाविशेष्यत्वरूपसाध्या
भाववत्त्वाभावान् हेतोः सत्त्वाद्व्याप्तिः । एवं घटभिन्नं घटत्वादित्यादौ साध्यनिरूपितप्रतियोगितावच्छेदकीभूतभावात्मकसंबंधेन घटत्वद
यसाध्याभाववति हेतुसत्त्वाद्व्याप्तिसंहारणाय स्वनिष्ठत्वनिवेशः । तथा सति घटभेदस्य घटभेदाभावत्वावच्छिन्नप्रतियोगिताकाभा
वतया घटत्वेन प्रतियोगिता । अन्यथा साध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वमदवच्छेदकत्वान्यतरावच्छेदकसंबंधेन साध्याभाववत्त्वं
निवेश्यानिष्टोत्पत्त्यान्यतरविशेषणं । न चैवं घटभेदसाध्यके अन्यतरत्वं गगनभातासमवायादाय व्याप्तिनाऽवकाशः । साध्यीयप्रतियोगिताया म
र्थंताभावत्वानिरूपितत्वानिवेशात् । घटभेदनिरूपितघटप्रतियोगित्वस्याऽर्थंताभावत्वानिरूपितत्वात् दवच्छेदकत्वं दुर्जेयार्थंताभावत्वं ॥१९॥

निरूपितत्वं वाच्यमित्यर्थः ।। अन्यथा साध्यीयघटत्वनिष्ठाद्यप्रतियोगित्वघटसाध्याभावे बाध्याभेदेन न चोक्तकल्पयोः साधारण्येन घटसाध्यकेऽव्याप्तिः । घट
भेदाभावस्य घटत्वरूपतया घटभेदात्मकस्य त्वन्मते निरूप्यप्रतियोगिताया असाध्यीयत्वादिति वाच्यं । घटत्वस्यैव घटस्यापि घटभेदाभावत्वोपग
मात् । नन्वेवं कल्पे द्वये घटभिन्नं कपालत्वादित्यादौ अव्याप्तिः घटत्वरूपसाध्याभाववति घटभेदप्रतियोगित्वस्य न द्वयोर्द्वित्वस्य पासत्वेन नरत्व घटे
कसमवायेन घटात्मकसाध्याभाववत्यवृत्तेर्गौरवतः । अत्र केचित् । साध्याभाववदवृत्तित्वघटकसाध्याभावे साध्यनिष्ठरूपेणाभाववत्त्वानिरूपितप्रतियो
गिताश्रयत्वं विशेषणं देयं । घटभेदात्यन्ताभावयोरभेदेऽपि तादात्म्येनाभाववत्त्वानिरूपितप्रतियोगिताश्रयो न घटः किंतु घटत्वमेवेति नाव्याप्तिः ।
यद्यपि द्वितीयकल्पे घटत्वस्य घटभेदप्रतियोगिताश्रयत्वान्निवेशनीयेतु वाक्ये निवेशनीये साध्यसमव्यापकनिष्ठरूपेणाभाववत्त्वानिरूपि
तप्रतियोगिताश्रयत्वं साध्याभावे निवेश्यं तथा सति घटभिन्नं कपालत्वादित्यादौ घटत्वात्मकसाध्याभावस्य घटत्वानुयोगिककालिकसम्बन्धावच्छि
न्नप्रतियोगिताक घटसामान्याभावस्य साध्यसमनियतत्वेन तादात्म्येनाभाववत्त्वानिरूपितप्रतियोगिताश्रयत्वया साध्यीयप्रतियोगिताव
च्छेदकतावच्छेदकसमवायेन तद्भावाभावात् कपालत्वे सत्त्वाद्व्याप्तेः । तथापि साध्याभावे साध्याभाववत्त्वावच्छिन्नप्रतियोगिताकाभाववन्निष्ठरूपेणा
भाववत्त्वानिरूपितप्रतियोगिताश्रयत्वं वाच्यं नातो दोषः । न च स्वरूपतः प्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वविवक्षितमिति नदो
षः । तथा चोक्ताधिकरणस्य तादात्म्येनाभाववत्त्वानिरूपितप्रतियोगितानिवेशाव्याप्त्यसङ्गतिः । प्रागुक्तात्मत्वप्रकारकप्रमाविशेष्यत्वाभावा

ग०टी०पं० हिसाध्यकेस्वनिष्ठत्वघटकसंबंधस्यार्थत्वदसंगतेश्च। अथ साध्याभाववैयेन तादात्म्यसंबंधावच्छिन्नसाध्यीयप्रतियोगितानवच्छेदकत्वं तदानीं घ
टभिन्नकपालत्वादिसाध्यकेऽव्याप्तिः। वह्निमान्धूमादित्यादौ वह्निमद्भेदभिन्नस्य वह्निस्वरूपस्य वा वह्निमद्भेदस्य साध्यीयप्रतियोगिता
अवच्छेदकत्वासिद्धिरिति चेन्नहि वह्न्यभावस्य वह्निमद्भिन्नतया साध्यीयवत्त्वादेरप्रतियोगिभाववत्त्वेनाव्याप्तेः। न च तादात्म्यसंबंधानवच्छिन्नप्रति
योगिताऽवच्छेदकं साध्याभावे देयं। अथवा तन्नाभाववत्त्वानिरूपितप्रतियोगिताऽवच्छेदकत्वं इति न दोष इति वाच्यं। तथा सति द्वितीयपक्षस्यैव
दत्वे घटभेदप्रतियोगितावच्छेदकत्वविरहेणाव्याप्तेः। यदि च तादात्म्यसंबंधानवच्छिन्नप्रतियोगिता तादात्म्यसंबंधावच्छिन्नप्रतियोगितावच्छे
दकत्वान्यतराऽवच्छेदकं तत्र देयमिति। तथापि घटभिन्नकपालत्वादिसाध्यकेऽव्याप्तिरेव। घटेऽपि घटभेदाभाववत्त्वावच्छिन्नप्रतियोगिताया
ऽवच्छेदकत्वानिरूपितत्वात् तादात्म्यसंबंधानवच्छिन्नत्वात्। अथेति चेन्न गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौऽव्याप्तिवार
णाय साध्याभाववत्त्वविशिष्टसाध्यधिकरणत्वे निवेशनमावश्यकं। तथा च कपाले घटभेदो नास्तीति प्रतीतिभयेन घटभेदाभाववत्त्वविशि
ष्टसाध्यधिकरणत्वानुपगमान्न घटभिन्नकपालत्वादित्यादौ दोषः। घटत्वं घटभेदाभाव इति प्रतीतिबलेन घटत्वेऽपि घटभेदाभाव
त्वावच्छिन्नसंबंधित्वं स्वीकार्यमिति नीलघटनाभाववत्त्वे विरहपक्षत्वावच्छेदेन पार्थक्यसंगतिः॥ परं तु घटत्वादौ घटभेदादिस ॥२२॥

नियोगित्वांगीकरणे पृथक्त्वस्यैवं स्वव्यक्तं मनसि कृत्य लाघवेन निवेशनैवैयर्थ्यं वोध्यमतो अथेति संयोगवत्वेति । प्रथमलक्षणमनुरुध्य संयोगिभेदस्य व्या
प्यवृत्तिसंयोगाभावभेदस्य भवनेन तदभावमादाय द्वितीयलक्षणसंगतेः । वस्तुतस्तु संयोगिभेदाभाववत्वं संयोगाभावाभाववत्वस्य संयोगरूपत्वेऽपि द्रव्यादिनि
संयोगाभावनिरूपतत्वं किन्त्वावच्छिन्नाभावो न संयोगो मानाभावादिति संयोगरूपसाध्याभावो नाव्याप्तिवारकः । द्रव्यत्वाभावाभेदसंभवेऽपि कपिसंयो
गिभेदादेः साध्यत्वे कपिसंयोगवत्वप्रकारकप्रमाविषयत्वाभाववत्त्वाभेदद्वितीयस्वरूपेऽपि तदभिधानं कालिकसंबंधावच्छिन्नाकाशाभावाभावसाध्य
के साध्यवद्भिन्नत्वाप्रसिद्धेराह । आकाशेति । स्वसाध्यतावच्छेदकधर्मसंबंधावच्छिन्नाभावः साध्यतावच्छेदकसंबंधेन वृत्तिर्न त्वकाशाभावाभावाका
शाभावोभयाभाववत्त्वस्यो दैशिकविशेषणतया भावत्वस्वोभयरूपत्वेन साध्यतावत्वं प्रतियोगितावच्छेदकीभूतविशेषणतासंबंधेन साध्याभा
ववति हेतुसत्वादव्याप्तिरतः साध्यतावच्छेदकधर्मनिवेशः । अन्यथा वक्ष्यमाणरीत्या साध्याभाववत्वेऽवृत्तित्वाधिकरणतानिवेशाद्दुष्करीत्या दोषकाव
शेषणतासंबंधेऽपि हेतुमति मेन संबंधेनाकाशाभावत्वाविशिष्टस्यैव वृत्तित्वेनु साध्याभाववत्वविशिष्टस्य । एवं तादृशाकाशाभावाभावसाध्यके
पीतिस्वातिप्रसक्तेर्व्यर्थं । अत्रेदं समाधानं । एतन्मते विशिष्टसत्ताभावसाध्यके साध्याभावो विशिष्टसत्ताभावाधिकरणमेव कालिकसंबंधावच्छिन्ना
काशाभावाभावसाध्यकादौ स्वाकाशाभावादिः । तथा च नाविशिष्टसत्ताधिकरणतानिवेश इति । अत्र साध्यवद्भिन्नमात्रनिवेशावश्यकत्वात्ः
उक्तत्वात् स्वाविशिष्टत्वे वैयर्थ्यमिति पूर्वपक्षस्तु नादरणीयः । तथापि तस्य साध्यवद्वृत्तित्वस्वरूपत्वेऽपि विशिष्टसत्ताभाववत्साध्यकस्थला

ग०टी०पं०

नुयोगितासंबंधेन साध्यवदन्याधिकरणताकस्यावच्छेदकतया कालत्वजातिलविशिष्टगगनाभावाभावस्य साध्यसमनियतत्वेन साध्यात्मकतया कालत्वजा
तिलविशिष्टगगनाभावस्य तदभावात्मनः साध्यवदन्याधिकरणताकस्याधिकरणे हेतुसत्त्वेनाव्याप्तितादवस्थ्यात्। न च तथापि साध्यनिरूपितविशिष्ट
प्रतियोगितावच्छेदकसंबंधेन विशिष्टविशेषणतायामव्याहतमिति वाच्यं। साध्याभावत्वरूपसाध्यीयप्रतियोगितायाः प्रतियोगि... कालि
कसंबंधावच्छिन्नप्रतियोगिताया एव साध्याभावस्वरूपानुयोगितारूपत्वात्। न च तथापि तत्कालीनविशिष्टगगनाभावाभावः स्वरूपेण तु व्याप्तिर्वा
रणाय साध्याभावत्वेनाधिकरणतानिरूपकतावच्छेदकत्वं विवक्षितत्वान्नाहि... साधिकरणतानिवेशावश्यकतया। स्वानिष्टसंबंधमिति वा
च्यं। एवं नहि विशिष्टाभाववान् समवायः संबंधेन तदभावविशिष्टबुद्धिवारणाय तदभावत्वेन तत्त्वनिवेशकल्पने। आधमानि कालिकसंबंधावच्छिन्ना
का साभावाभावो नास्तीति मत्वा प्रतियोगितासंगस्य गगनाभावीयकालिकसंबंधावच्छिन्नाभावाधिकरणताविरहादेव वारणसंभवात्। तत्र सा
ध्याभावत्वेन रूपं न रूपमानप्राधान्यमनमवलंब्य। स्वविशिष्टत्वस्य निवेशनीयत्वात्। एवं धर्मिनिवेशप्रकारः। न च साध्याभावाधिक
रणतामेवं धेयनिवेश्य तत्र साध्यवदन्यतरत्वं निवेशनीयमिति वाच्यं। तथा सति वृत्तिकरणभेदेन नानाधिकरणनानाभेदादेवस्य योगसाध्यवा
व्याप्तित्वात्से संयोगाभावे भेदमतानुधावनस्यानिर्वाच्यत्वापातात्। इदं तु बोध्यं। साध्यवद्भिन्नमात्रवृत्तित्वस्य योगावश्यकत्वमुक्तं तत्र
साध्यवद्भिन्नमात्रवृत्तित्वं साध्यवदवृत्तित्वं। कालिकसंबंधावच्छिन्नाभावाभावः साध्यके कालिकसंबंधेन साध्यवद्वृत्तित्वात् असिध्या ॥२९॥

अव्याप्तेः। किंतु स्वव्यापकसाध्यवद्भिन्नत्वं। एवं च महाकालमात्रवृत्तिविशेषणतासंबंधेन प्रमेयसाध्यके साध्यतावच्छेदकसंबंधेन साध्यव-
द्भेदस्य कालिकसंबंधेन साध्यतावच्छेदकधर्मसंबंधावच्छिन्नसाध्याभावसमानाधिकरणत्वेपि नदव्यापकत्वादेर्विशेषणतासंबंधेन न व्या-
पकत्वात् संयोगसंबंधेन स्वरूपसंबंधेन वा द्रव्यत्ववृत्तित्वविशिष्टाभावसाध्यके साध्यवद्भेदस्य तादृशसंबंधेन तादृशसाध्याभाववद्वृत्तित्वेपि नदव्या-
पकत्वाद्विशेषणतासंबंधेन न व्यापकत्वाच्च। विषयतासंबंधेन प्रमेयसाध्यके साध्यवद्भेदस्य कालिकसंबंधेन साध्याभाववद्वृत्तित्वेपि नदव्या-
पकत्वात् विशेषणतासंबंधेन न व्यापकत्वाच्च। कालिकसंबंधावच्छिन्नगगनाभावाभावसाध्यके साध्यवद्भेदस्य विशेषणतासंबंधेन साध्याभा-
ववद्वृत्तित्वेपि नदव्यापकत्वात् कालिकविशेषणतासंबंधेन न व्यापकत्वाच्च न पूर्वपक्षावसरः। एवं च स्वनिष्ठत्व प्रयोजनं किंस्यमेव। परे तु स-
मवायेन समान्य प्रमेयसाध्यक द्रव्यत्वप्रकारकप्रमाविषयत्व हेतुक प्रभृतिस्थले संग्रहाय साध्याभाववच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपा-
वच्छिन्नानुयोगिताकत्वनिरूपणत्वयोगित्वं विवक्षितं। न चैवं त्वन्निरूपकत्वव्यर्थं। कालिकसंबंधावच्छिन्नाकाशाभावाभावसाध्यके कालिक-
संबंधावच्छिन्नाकाशसाध्याभावाभावत्वस्य साध्यव्यापकतानवच्छेदकत्वादिति वाच्यं। अवच्छिन्नत्वं व्यापकत्वं। तथा च तादृशसाध्याभा-
वाभावनिष्ठानुयोगितायाः साध्यव्यापकतावच्छेदकरूपव्यापकत्वेन न तत्सार्थक्यात्। अन्यथा निरुक्तवृत्तिधर्मस्यावच्छेदकत्वांगीकारे द्रव्य-
वृत्तित्वविशिष्टाभावसाध्यके यथोक्तसाध्याभावस्य कालिकसंबंधावच्छिन्नाभावो नित्यद्रव्यमात्रवृत्तिरिति तथात्वे च साध्याभा

ग॰ दी॰ ग्रं॰

वच्छेदकावच्छिन्नानुयोगितामादाय व्याप्तेरित्राप्रे एवं च निरुक्तविशिष्टाभाववानित्यत्वादिप्रसिद्धौ साध्यतावच्छेदकधर्मसंबंधावच्छिन्नाभावत्वस्य
य॰ कालिकसंबंधावच्छिन्नाभावत्वस्य निरूपितानुयोगितायाः साध्यव्यापकतावच्छेदकरूपत्वे व्यापकतानिरूपितप्रतियोगितावच्छेदककालिक
संबंधेन साध्यवद्वृत्तित्वे सति साध्याभाववति महाकाले हेतुसत्त्वेऽपि नाव्याप्तिरिति वस्तुतः। वस्तुतस्तु विशिष्टसत्ताभावाभाववोद्व्यत्वमेवं कालवृत्तित्व
विशिष्टसत्ताभावाभावः कालत्वाभावः। एवं च गगनाभावे कालिकसंबंधावच्छिन्नाभावत्वेन प्रतियोगिता न तु दैशिकविशेषणतासंबंधावच्छि
न्नाप्रतियोगिताकत्वविशिष्टाभावीयप्रतियोगितायाः गगनाभावेऽनंगीकारादिति स्वनिरूपितनिवेशनमावश्यकं। धर्मनिवेशप्रयोजनमाह। साध्यनिरूपि
तत्वं तु साध्यव्यापकतावच्छेदकानुयोगिताकत्वमिति न साध्यवद्भिन्नमात्रवृत्तित्वपर्यंतनिवेशनं इति। अभावांतरेति। यद्यपि कालिकसंबंधावच्छिन्ना
कारकाभावाभावसाध्यके कालिकसंबंधावच्छिन्नसाध्याभावांतरनिष्ठप्रतियोगितायाः साध्यनिरूपितत्वादसंगतिस्तथापि साध्यवद्भिन्नवृत्त्यभा
वे साध्यवत्त्वानुपादाने स्वनिष्ठेत्यस्य स्वपदार्थो यदि साध्यतावच्छेदकसंबंधेन निवेश्यते तदा तादृशाभावस्य स्वपदार्थत्वे प्रतियोगि
तानवच्छेदकधर्मतदैशिकविशेषणतासंबंधेन तस्य न साध्यवद्भिन्नवृत्तित्वसंभवः। अथ तन्न निवेश्यते तदा तादृशकालिकसंबंधेन का
लत्वेन तादृशाभावांतरसत्त्वान्नाव्याप्तिरिति प्रभावांतरेत्यस्य साध्यतावच्छेदकधर्मावच्छिन्नाभावभिन्नाभावे व्यर्थत्वं। साध्यनिरूपितत्वे
त्यस्याभावांतरस्य साध्यतावच्छेदकधर्मसंबंधावच्छिन्नप्रतियोगिताकत्वे सत्यभिधानासंगतिः। स्वपदार्थस्येति। साध्यवद्भिन्नवृत्त्यभाव ॥२२॥

व साध्यवत्त्वांशे निवेशवैयर्थ्यमिति तिरस्कृताभिप्रायेणाह नैव साध्यतावच्छेदकधर्मसंबंधावच्छिन्नाभावनिवेशस्यैव प्रयोजनाभावानुरोधेन स्वीकार्यत्वे
पि समभिव्याहृतत्राद्यांशस्य प्रतिपाद्यस्यैव स्वरसाद्देन परामर्शात् तादृशसाध्यनिष्ठप्रतियोगितावच्छेदकसंबंधेन साध्यवद्भिन्नवृत्तित्वं तादृशसाध्याभा
वनिष्ठप्रतियोगितावच्छेदकसंबंधेन तत् स्वरूपस्यैव निवेश्यत्वात् [...] संबंधघटकतया साध्यवद्भिन्न इत्यनुयोगितया भेदस्य
साध्याभावो निवेशनीय एव। एवं च पुनः साध्यवत्तांशे निवेशप्रयोजनमनिष्पाद्य [...] तद्वैयर्थ्यमिति। एतेन साध्यवद्भिन्नमात्रवृत्तित्वं निवेश्यताम्
[...] साध्यतावच्छेदकधर्मसंबंधावच्छिन्नप्रतियोगिताकत्वं व्यर्थं [...] वह्नित्वाभाववद्द्रव्यत्वाभावान्यतरस्य कालिकसंबंधेन द्रव्यत्वाभावादेर्व्यं
साध्यताया द्रव्यत्वात्मकसाध्याभावस्य साध्यवद्वृत्तित्वेन लक्षणघटकतया [...] दोषाविरहितसमाहितम्। संबंधघटकतया घटकीभूतसाध्याभावान्यत्वमसा
ध्यवद्भिन्नमात्रवृत्तित्वानिर्वाहात्। एतेन साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वानुपादाने धूमवान्वह्नेरित्यादौ संयोगसंबंधावच्छिन्नद्रव्यसामान्या
भाववत्तया पर्वतादिव्यक्तित्तद्भावस्य धूमादिरूपत्वात्। यद्यपि च साध्यनिरूपितप्रतियोगितावच्छेदकसंबंधेन यस्य यस्य साध्यवद्भिन्नवृत्ति
त्वं तत्र सप्रतियोगिकरणवृत्तित्वाभावकूटं विवक्षितम्। अथवा साध्यनिष्ठसाध्यनिरूपितप्रतियोगितावच्छेदकीयः स्वाश्रयनिष्ठसाध्यवद्भिन्नवृत्तित्वाभावा
वच्छेदकसंबंधः तेन संबंधेन साध्याभाववत्त्वाश्रयाधिकरणवृत्तित्वाभावः धूमाभावसाधारणं च साध्याभाववत्त्वमित्यदोष इत्युच्यते। न तादृशवह्निमान्धूमा
दित्यादौ महानसीयवह्न्यभावमादाय व्याप्तिरिति तदनुधावनमात्रपरकमिति [...] नादेयः। साध्याभावमनिवेश्य प्रकारान्तरेण निवेशो दूषण

ग॰टी॰ प॰ माहसाध्येति। अत्र वह्निमान्धूमादित्यादौ स्वनिरूपितप्रतियोगितावच्छेदककालिकसंबंधस्तु तासाय साध्यनिरूपितत्वानि वेशा दृत्येवं। अत्रेदमवह्नि
धेयमवसेयं। विशेषरूपेण संबंधत्वोपगमेपि निरवच्छिन्नविशेषणतासंबंधावच्छिन्नकपिसंयोगाभावाभावः। कपिसंयोगस्वरूपोनोपगम्यते प्रतियो
गिताभावादिति आशंक्यैतेन रसंगतिः। न च सिद्धान्ते साध्यत्वाभावादेरप्रसिद्धिस्तत्र न संबंधानवेशासंभवइति वाच्यं। भावाभावसाधार
णविशेषणतावेगीकरणात्तादृशस्थलेमानाभावादिति। यादृशसंबंधेनेत्यादि। दूरेमनुचितम्। साध्यवद्भिन्नवृत्तिसाध्याभावसाध्यवन्निरूपितया
दृशसंबंधावच्छिन्नवृत्तित्वाभाववानिति येन संबंधेन साध्यवद्वृत्त्यभावप्रतियोगितेति वानार्थः। समवायेन वृत्तितावच्छेदकाभावाभावसाध्यके समवा
यकालिकसंबंधासंग्रहापत्तेः। साध्यवत्त्वेनेन संबंधेन वृत्तित्वाप्रसिद्धेः। साध्याभावस्य साध्यवद्वृत्तित्वसंबंधानवच्छेद्यमिस्यापनार्थः। आत्म
त्वादिसाध्यके साध्याभावे साध्यवद्वृत्तित्वाप्रसिद्धेः। न च यत्संबंधावच्छिन्नत्वं तादृशसाध्याभाववान्निष्ठायेयत्वं साध्यवदनिरूपितमित्यर्थः। विशे
षसत्ताभावसाध्यके समवायसंग्रहात्। नापि यत्संबंधावच्छिन्नस्याभावः साध्यतावच्छेदकसंबंधेन साध्यव्यापकइत्यर्थः। इमोपि लयो यत्सं
बंधावच्छिन्नाभावः साध्यमिति केचिन्न कारैरेवोक्तत्वात्। घटभेदघटत्वभावयोर्भेदमनुरुध्यस्य स्वत्वं साध्यवत्त्वेत्यादि प्रकारादरणात्। सामान्य
प्रमेयसाध्यकस्थलेनुरोधेन साध्यव्यापकनिरूपितप्रतियोगितायाः निवेशेपि केचित्तु कारमनापरित्यागाच्च। अथ साध्यवद्भिन्नवृत्ति
साध्याभावस्य यत्संबंधावच्छिन्नाधिकरणता सामान्यं साध्यवतिनास्तीति निष्कर्षः। तेन सत्ताभावसाध्यकेन दोषः। इदानीं कालिकसं १२३५

संबंधावच्छिन्नाधिकरणतावच्छेदकत्वाय सामान्यपदं। विशिष्टसत्ताभावसाध्यकेऽव्याप्तेः समवायसंबंधेन यः साध्याभाववत्त्वविशिष्टस्य निरूपितत्वं देयमिति भेदः
आत्मत्वाभावादिमत्यादौ कालिकविशेषणतादिसंबंधस्य ग्रहणे तन्मते तत्र साध्याभावादव्याप्तिविरोधिग्रहविषयसंबंधेन साध्याभाववत्त्वघटितत्वेऽपि
व्याप्तिविरोधिनोऽव्यभिचारपदार्थत्वाभावाविरोधात्। आत्मत्वादिसाध्यकात्मत्वान्यतरस्मादित्यादौ विशिष्टविशेषणताघटिताव्यभिचारस्य सत्त्वेऽपि का
लिकादिघटितत्वग्रहणस्यापि हेतुपरिष्कारे च। एतेन यत्संबंधावच्छिन्नस्वाभावः साध्यव्यापक इत्यर्थः। साध्यसामानाधिकरण्यघटकसमवायादिसाध्य
के कालिकसंबंधस्य ग्रहप्रसंगः। तदपि संयोगाद्यभावाभावस्य साध्यव्यापकत्वार्थं व्यापकतायां प्रतियोगितावच्छेदकसंबंधे साधिकरण्यं देयं। एवं वक्ष्यमाणभावस्य कालिक
संबंधावच्छिन्नाभावस्य केवलान्वयित्वेऽपि न कालिकसंबंधावच्छिन्नसंग्रह इत्यपास्तं भिन्नविशिष्टवृत्तिसाध्यवत्तायां साध्यवद्भिन्नत्वे साध्याभा
वनिरूपितत्वनिवेशेनाव्याप्तेरतिव्याप्तेश्च साध्यकत्वात्। ननु सकलसाध्यवद्भिन्नवृत्तिसाध्याभाववत्त्वे निरुक्तधारणे सामानाधिकरण्यसंबंधेन सा
ध्यवत्तु निवेशात् साध्यसामानाधिकरण्याप्रायः साध्याभावाधिकरणत्वे तत्र समानाधिकरणतायाः साध्यसमानाधिकरणतया विशिष्टसाधिक
रणतापत्तिः अन्यत्राव्याप्तिरिति विशिष्टसाधिकरणत्वं विवक्षणे नेति चेन्न तथात्वे साध्याभावप्रवेशवैयर्थ्यापत्तेः। घटत्वेति।
घटत्वघटकालसंयोगोभयाभाववत्साध्यके तु साध्याभाववत्त्वे साध्यवद्भिन्नत्वनिवेशपक्षे अव्याप्तिवारणं स्फुटं भिन्नत्वे निरस्त
भिन्नत्वे। संयोगभिन्नगुणत्वादिव्याप्यादौ अतिरिक्तस्य संयोगत्वप्रकारकप्रमादिसत्त्वे तद्विषयत्वेन वा साध्याभावस्य प्रवेशे नाव्याप्तिः।

ग॰ टी॰ पं॰ गगनेऽपि। अयं च गगनघटसंयोगावच्छेदकदिगाद्यवच्छेदेन बोध्यः। साध्यवद्भिन्नवृत्तेः। न च हेत्ववच्छिन्नव्यक्तिकसाध्याभाववन्निवेशेनैवोपपत्तौ निसा
ध्यकाव्याप्तिवारणाय साध्यवद्भिन्नीयत्वं व्यर्थमिति वाच्यं। तत्त्वविषयस्यैव लाभात्। अथ स्वानाश्रयनिरवच्छिन्नवृत्तित्वानुयोगितावि। शेषो
भयसंबंधेन साध्यवत्त्वमभावे निवेश्यमिति तद्वैयर्थ्यमिति चेन्न। संबंधान्तरसहितानुयोगितायाः संबंधत्वस्याप्रसिद्धेः। निरवच्छिन्न
वृत्तिकत्वमनुयोगितावच्छेदकमात्रस्य संसर्गत्वेनोपपत्तेश्च। अन्यथा स्वानाश्रयत्वस्वाभाववत्त्वोभयसंबंधेन साध्यवत्त्वस्याधि
करणे निवेशे न सार्थक्यसंभवात् कर्मधारयनिराकरणानुपपत्तिरिति।। तथा सतीति।। स्वमते चेत्याद्यासीन्न तत्तदभावरूपसाध्याभावस्य
प्रतियोगिवैयधिकरण्याद्युपादानेन तत्तद्भिन्नतयाऽधिकरणभेदेन भिन्नत्वाभावात्। ईश्वरे नित्यसंयोगिकत्वमस्ति व्यभिचार
इत्यतः स्वत्वादिपरिचायकपदं। आदिना द्रव्यादिपरिग्रहः। दीधितिकारोक्तमानाभावं द्रव्यत्वादित्यादि। धर्मिणां अधिकरणभेदे
न भिन्नद्रव्यत्वाभावादीनां।। विनिगमनेति। विनिगमनाविरहेण संयोगाभावरूपधर्मिणोऽप्यनन्ताधिकरणवृत्तितयाऽनतिरिक्तत्वमावश्यक
कं। विनिगमनाविरहेणासिद्धेरुभयमेव सिध्यतीति भावः। तथा च मानाभावेन निरधिकरणमात्रमिति। तत्र व्यापकतावच्छेदक। तत्र
द्रव्यत्वसंयोगाभावाद्यन्यस्य गुणादौ विनिगमनाविरहेण सिद्धत्वादिति। वह्निमान् धूमादित्यादौ कपिसंयोगी एतद्वृक्षत्वादित्या
दाववाप्यभावादेरपरिहार्यत्वादिति। नानेति। पर्वतीयाधिकरणे वह्न्याद्यभावाधिकरणीयप्रतियोगिनि। स्वानधिकरणत्वस्य सामानाधि ॥२४॥

करणकोभयसंबंधेन प्रतियोगितावच्छिन्नत्वमर्थः। न च वह्निमद्देशस्य स्वाभाववत्त्वप्रतियोगित्वनिर्वचनादास्वावच्छेदकप्रतियोगितोपादाना
न्नानयोपकर्णाभाव्याप्यवृत्तिसाध्यकव्याप्तिनिरासान्वेरं समंजस्यमिति वाच्यं। एवं कपिसंयोगवान् नैतस्मादित्यादौ प्रतियोगितावच्छेदको
घणस्य तेन लक्षणसंगतेः। कपिसंयोगी एतत्त्वादित्यादौ कपिसंयोगवद्वृत्तिभेदमादाय अव्याप्यवृत्तिसाध्यकसद्धेतु
स्यावच्छेदेनाव्याप्तिरूपकालिकसंभवात्। क्षिप्रिमो साध्येवेति। ननु महानसीयवह्न्यादेरपि विषमस्मात् यत्साकल्येन स्वाभावसामानाधिकरण्या
प्तिः स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन साकल्येन साध्याभाववगामित्वे धूमावस्थावच्छिन्नाभाववगामित्वाव्याप्तिः। ननु साकल्योपादाना
त्साध्याभाववच्छेदकव्यापकताभावच्छेदकस्वप्रतियोगिताविशेषत्वमर्थः। तेन प्रतियोगिताया स्वरूपसंबंधत्वेपि नव्याप्यभावासंग्रह इति वाच्यं
। यथा सत्येकत्वा। सकिंचित्साध्यमित्यादिना साध्ये साकल्या प्रसिद्ध्यभिधानासंगतेरिति चेन्न। एतत्साध्यपर्याप्त्यावत्त्वं पर्याप्तिसंबंधे
नाविशेषणं। यद्वा साध्याभाववच्छेदकसमानाधिकरणयावद्धर्मसमानाधिकरणानेकव्यक्तिप्रतियोगिताकाभावः साकल्ये साध्याभावव्याप्त
र्थः। अनेकत्वनिवेशे च स्वानुयोगिकत्वनिरूपकस्वानाश्रयत्वानिरूपितप्रतियोगित्वनिरूपितत्वोभयसंबंधेन भेदस्य तां॥ तेन द्रव्यत्वादेर्द्रव्यत्वघटत्वोभय [illegible]
भेदसत्त्वेपि न क्षतिः। स्वानाश्रयत्वानिवेशान्न॥ एवं च साध्यस्यैकत्वेपि साध्याभाववच्छेदकीयनानालक्षणावच्छिन्नानुयोगितानानात्वेपि ऽ
नेकस्वाभावान्न सकलप्रसिद्ध्यभिधानासंगतिः। साध्याभाववच्छेदकव्यापकानेकव्यक्तिप्रतियोगिताकइत्याप कुत्रिकं विधेयावयवस्थेत्याह

ग०टी०प० विशेषणमिति। यत्किंचिद्विपक्षव्यावर्तकमित्यर्थः। वास्तवं समानवृत्तिकं विशेषणं मया संपाद्यते। एवं च गगनातिरिक्तधर्मवदन्यत्वादित्यादौ घट
त्वादिलक्षणं न तु साध्याभाववद्वृत्तित्वाभावप्रतियोगित्वेऽपि तत्प्रयोजनाभावस्य तत्सत्वेन यथार्थत्वस्य व्याप्तिवारणं हेतुप्रकल्स्य
साध्याभाववत्वमपि साधकस्याविरोधकत्वं विनानुपपत्तिरित्याशयः। ननु साध्ये साधकस्य तत्प्रयोजनमायास्यत्येव। एतद्रूपगगनोभयवानेन
व्यक्तित्वादित्यादौ प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्ध्या एतद्रूपगगनोभयाभावस्य लक्षणघटकतया एतद्रूपाभावमादायाऽ
तिव्याप्तिर्विपक्षे साधकस्य तन्मात्रव्यवारणाय साध्ये साधकस्याविरोधित्वेनैव वारणात्॥ तस्य साधकस्य साध्याप्रतियोगिकत्वात्। एतद्रूपगग
नोभयाभावस्य प्रतियोगिवैयधिकरण्याभावात्॥ न च प्रतियोगिवैयधिकरण्यघटकप्रतियोगितावच्छेदकवैशिष्ट्यस्य साध्यता
वच्छेदकतावच्छेदकसंबन्धेन निवेशनीयतया पर्याप्तिसंबन्धेनैतद्रूपत्वविशिष्टासंभवादेतद्रूपाभावे स लक्षणघटकतया साध्ये साधकस्याऽवि
रोधत्वात्वेऽपि न क्षतिरिति वाच्यम्॥ तथाप्येतद्रूपरसोभयाभावमादायातिव्याप्तेर्दुर्वारत्वात्॥ न चैवमपि एतद्रूपगगनान्यतराभा
वमादायातिव्याप्तेर्दुर्वारत्वे तथापि अन्यतरत्वस्य प्रत्येकधर्मत्वेन तद्वृत्त्यभावस्य साध्यानिरूपितप्रतियोगिताकत्वाभावात्।
तत्सत्वे एतद्रूपाभावसमनियतत्वेन लाघवेनैतद्रूपत्वस्यैव प्रतियोगितावच्छेदकत्वोपगमाच्च। न च साध्ये साधकस्यानुपादानेऽपि न ॥२५॥
त्रैवैतद्रूपवद्वृत्तित्वाद्यधिकरणाभावं नहुप्तावच्छिन्नाभावं पादाय नातिव्याप्तिरिति वाच्यम्। एतद्रूपप्रतियोगित्वाविशेष

समवायसंबंधेन एतद्रूपगगनोभयसाध्यके एतद्रूपाभावस्यैव गगनाद्यसंबंधेन प्रतियोगिव्यधिकरणस्य यावन्मात्रायातिव्याप्तिवारणाय तदवच्छिन्नत्वकल्प
ना।। विशेषरूपेण संसर्गतानुपगमेपि समवायेन गगनाभयवान्घटत्वादित्यादौ शुद्धसमवायेन साध्यतायां हेतावतिव्याप्तिवारकत्वेन विना सा
ध्याभाववत्ति साकल्ये तद्भिन्नत्वेन स्वावच्छेदकत्वात्। साध्यतावच्छेदकता घटत्वसंबंधेन प्रतियोगितावच्छेदकविशेषणस्योक्तावपि समवायसम
वेतोभयाभावमात्रयातिव्याप्तिरस्येव। वह्निधूमोभयाभाववद्वृत्तेः स्वभावस्य सर्वत्र सत्त्वात्। एवं द्रव्यत्वगगनोभयवान्द्रव्यत्वादित्यादौ समु
दायेनैव साध्यत्वे साधनत्वेन च द्रव्यत्वकपालोभयाभावमात्रायातिव्याप्तिर्दुष्पा।। एवं घटत्वप्रकारकप्रमाविशेष्यतीयस्वरूपसंबं
धेन घटत्वप्रकारकप्रमाविशेष्यत्व घटवान्धूमेनतदुभयसाध्यके घटत्वादौ व्याप्तिवारणाय साध्ये साध्याभावस्य मुख्यप्रयोज
नं तथा सति न चैतद्रूपवति तावद्वह्न्याभावादिलक्षणघटकतया साध्याभाववृत्तिः वह्न्याभावस्य प्रतियोगिव्यधिकरणस्याभावेन
नातिव्याप्तिरिति चेन्न।। साध्ये साधकस्य दाने गगनघटितोभयादिसाध्यके एतद्रूपवद्व्याप्ति तावद्वह्न्याभावस्य नद्रूपवत्तेः
वह्न्याभावादेश्च घटत्वप्रकारकप्रमाविशेष्यत्वघटितधर्मे तदुभयसाध्यके साध्यतावच्छेदकसंबंधेन प्रमेयसामान्या
भावस्यैव सकलसाध्याभावप्रतियोगिताकत्वाभावमात्रायातिव्याप्तिर्दुष्परिहरेति अव्याप्तिवारणस्यैव आसत्वप्रयोजन

ग॰टी॰पं॰

नोभयसाध्यके साध्यतावच्छेदकरूपपर्याप्त्यधिकरणनिष्ठप्रतियोगिताकाभावस्यैव साध्याभावपदेनाविवक्षितत्वात् तथापि चोभयाभावमादायैव नाति
व्याप्तिः। न च वक्ष्यमाणप्रतियोगिवैयधिकरण्यासंभवेन तथाविधोभयाभावस्योपादानस्यैवासंभव इति वाच्यं। अतिव्याप्तिवारकतया साध्ये साध्यकत्व
न्यथासिद्धं भावो ऽतिव्याप्तिवारणमात्रस्यैवास्माभिरवलंबितत्वात्। वस्तुतस्तु विपक्षे साध्यकत्वासत्त्वे साध्याभावे प्रतियोगिवैयधिकरण्यस्य व्यर्थ
त्वमिति तथाविधोभयाभावस्य साध्याभावत्वेनासादनान्नातिव्याप्तिरिति साध्ये साध्यकत्वस्य नातिव्याप्तिवारकत्वेनावश्यकता तस्माद्विपक्षे साध्यको
दते पश्चादतिव्याप्तिवारकतयैव साध्ये साध्यकत्वविशेषणदानस्यौचित्यं। अव्याप्तिवारकत्वेन प्रयोजकत्वासंभवे ऽपि व्याप्तिवारकत्वेन तत्त्वन
दर्शनस्यापाद्यौचित्यस्य तात्। उक्तस्थले चाविपक्षे साध्यकत्वाप्रदानेन अव्याप्तिसंभवेनापि प्रतियोगिवैयधिकरण्यप्रवेशात् तथाविधसाध्याभावप्रसि
द्धेवनातिव्याप्तिरिति च विपक्षे एवेयाकूसाध्यकत्वनिवेशो दर्शितः। इत्याकूतं। अत्र साध्ये साध्यकत्वाविवक्षणे साध्यतावच्छेदकावच्छिन्नाभावस्या
न क्वचिदेव गगनवन्निष्ठेत्युभयाभावसाध्यके ऽव्याप्तिवारकतया साध्यकत्वयोरेव नैरर्थक्यापत्तेः स्वावच्छिन्नत्वस्याशयेनाह। वस्तुतोऽस्तीति। अविव
क्षिते इति। एतत्पक्षे वह्निमान्धूमवान्वायादित्यादौ दोषवारणाय साध्ये साध्यकत्वस्योक्तावपि साध्यतावच्छेदकावच्छिन्नाभावप्रवेशात्पक्षे विप
क्षे साध्यकत्वासत्त्वादतिव्याप्तेर्दुर्वारत्वादितिभावः। जगदीशेन तु साध्यविपक्षयोः साध्यकत्वासत्त्वेऽपि साध्याभावे साध्यकत्वाभावात् अतिव्याप्तिवि ॥२६॥
लक्षकत्वे न साध्यतावच्छेदकसंबन्धावच्छिन्नाभावप्रवेशेन संगच्छते। तेनाव्याप्तिरिति। अव्याप्तिर्वेति। अत्र ननु नादिपदार्थात्मत्वादिना

त्त्वेन साध्याभाववदवृत्तित्वासंभवः। गगनाभिन्नं घटत्वादित्यादौ पक्षादेर्वृत्तित्वाद्यदन्यतमतया बह्न्याभाववन्मात्रावृत्तितैर्वाव्याप्तेः संभवादिति। न साधु। साध्य
तावच्छेदकसंबंधावच्छिन्नसाध्याभाववनिवृत्तित्वादिति सद्वृत्तितं। न च भवद्भिमते प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वविशेषणे लाघवात् साध्यतावच्छेदक
संबंधेन प्रतियोगिवैयधिकरण्यस्यैव प्रवेशे तादृशसंबंधेन गगनवृत्तितायाश्च नीनां स्वरूपसंबंधेनाभावप्रतियोगित्व कुत्रापि करणादसिद्धेः अगत्याश्रौ
योऽतिव्याप्त्युद्धारः मधुनानाथीयोऽसंभवश्च संगच्छते एवेति वाच्यं। कालिकादवमधिकृत्याव्याप्तेर्वास्माभिरुक्तिर्याना हित्वादित्यतो। पक्षधर्मता
वच्छिन्नवह्न्याद्यभावस्य सकलैः साध्याधिकरणवृत्तियोगिकत्वापत्तिवागः। नथावृ[illegible]। अथ पिण्डान्वयविशिष्टः एव वह्निधूमान्यतराभावस्य न सम्भव
साध्याभावः। साध्यतावच्छेदकातिरिक्तवृत्तिसाध्यतावच्छेदकातिरिक्तधर्मविशिष्टप्रतियोगिताकाभावनिवेशोऽतिरिक्तत्वेनैव वह्निधूमान्यतराभावस्य
वैयाधिकरण्ये तादृश व्याप्त्यर्थेऽतिव्याप्तिः। यदि चतादृशातिरिक्तधर्मानिरवच्छेदकत्वं सामान्याभावनिवेशेनैवानन्धर्माविवक्षितैवेत्यर्थः कथं
नेमहानसमेयवह्निमान्धूमादित्यादौ गुरुधर्मस्य प्रतियोगितावच्छेदकत्वेनवह्नेर्वह्नित्वावच्छिन्नाभावस्य स्वरूपाद्यभावे तदुपादानमावश्यकं। संयो
गादिना प्रमेयवत्साध्यकस्थलेऽनुरोधेन स्वानवच्छिन्नपकाराभावच्छेदकत्वस्य पर्याप्त्यनविशेषणावधारणस्य पक्षे साध्यतावच्छेदकान्यत्वं वा
च्यं। नन्वेवं प्रमेयवह्निधूमोभयवान्धूमादित्यादौ भगतिरेव। वह्निधूमोभयत्वावच्छिन्नाभावस्य स्वप्रतियोगिकत्वादिति चेन्न। तत्र कुत्रचिद्वह्नि
त्वावच्छिन्नाभावस्यैव तत्प्रतियोगिकत्वानियतसंबंधेन वह्नित्वाविशिष्टस्य साध्यत्वे धूमत्वावच्छिन्नस्य प्रतियोगित्वाभावेन वह्नित्वावच्छिन्नाभाव

ग.टी.पं.

मात्रवृत्त्यव्याप्तिवारणाय साध्ये साध्यतावच्छेदकमात्रवत्त्वरूपकमिति कथमुक्ताभावो लक्षणघटकश्चेदिति वाच्यं। यत्र वह्निधूमोभयत्वं गुरुधर्मस्वरूपसंबंधेन साध्यता-
वच्छेदकं तत्र पर्याप्तिसंबंधेन वह्निधूमोभयत्वावच्छिन्नाभाववारणाय प्रतियोगितायां साध्यतावच्छेदकतावच्छेदकसंबंधावच्छिन्नावच्छेदकताकत्व-
स्यावश्यकत्वेन यत्र तत्र समवायेन वह्नित्वविशिष्टाभाववारणसंभवात्। साध्ये साध्यत्वस्य कथं स्यात्। नच महानसीयवह्न्यभावादिवारणा-
य तत्र साध्यत्वमात्रवत्त्वपदं। तादृशसंबंधान्यसंबंधावच्छिन्नावच्छेदकताकस्याभावानिवेशेपि महानसीयवस्तुयोगघटितमहानसीयवह्न्यभाव-
वारणादिति वाच्यं॥ साध्यतावच्छेदकमादितरत्वस्यावच्छेदकताकसामान्यस्यापि विशेषणत्वात्। वह्निधूमयोः संबंधान्योभयत्वस्य साध्यताव-
च्छेदकत्वेन वह्नित्वप्रकारकप्रमाविशेष्यत्वाभावः स्वभावोबोध्यः। लाघवादिति। अथ गुरुधर्मेण साध्यतायाः स्वरूपसंबंधेन प्रकृते साध्यव्याप-
कतावच्छेदकत्वरूपावच्छिन्नाभावस्य वाच्यतया कथं लाघवमिति वाच्यं। व्यासज्यवृत्तित्वविशिष्टसाध्यतावच्छेदकपर्याप्तावच्छेदकताकत्व-
सामान्याभाववत्त्वप्रतियोगितावच्छेदकत्वमेव निवेश्यं। साध्यतावच्छेदकपर्याप्तिविषयताश्रयव्यासज्यवृत्तिधर्मावच्छिन्नत्वसामान्याभाववत्त्वप्र-
तियोगितावच्छेदकत्वनिवेशो न तु पर्याप्तिव्यासज्यवृत्तिधर्मनिष्ठावच्छेदकताघटितत्वाद्विशेषणनिवेशे च महागौरवात्। एतच्च साध्यताघटकसंबं-
धावच्छिन्नावच्छेदकताकत्वविशेषणावश्यकतापत्त्या गौरवाच्च। एवं च गुरुधर्मेण साध्यतास्थलानुरोधेनापि पारिभाषिकं साध्यताव- २७॥
च्छेदकमेवाभिनिवेश्यं। प्रमेयवह्निधूमोभयसाध्यकेपि वह्निधूमोभयाभावत्वलक्षणघटकेन। एवं साध्ये साधकत्वमप्यावश्यकं। न च साध्यव्या

पक्षतावच्छेदकताप्रतियोगितावच्छेदकतयोरेकसंबंधावच्छिन्नत्वानिवेशात् कालिकसंबंधेन वह्नित्वावच्छिन्नसाध्यके समवायेन वह्नित्वविशिष्टाभाव
संग्रहप्रसंगादिति वाच्यं। सिद्धसमभिव्याहारेण साध्ये साध्यसंबंधस्यैवाभिधानात्। एवं च नापार्थ्यो किंसंगतिः। यत्संबंधावच्छिन्नावच्छेदकत्वं स
कलसाध्यनिष्ठप्रतियोगितायां गृह्यते तेन संबंधेन साध्याभावो साध्यतावच्छेदकस्याभासमहति निपुणेन कालिकसंबंधेनाभाववह्नित्वविशिष्टाभावपरा
मर्शात्तित्ववह्नित्वसमवायावच्छिन्नावच्छेदकताविधेयतानाशादनुमित्यापत्तिरिति। एतेन प्रमेयवह्निधूमोभयसाध्यकेऽगतिरेव। किंच व्या
सज्यवृत्तित्वं गुरुधर्मस्यानवच्छेदकत्वमतेनोक्तपर्वतेऽनुमेयावच्छेदकत्वमते सिद्धसंभवविरोध इत्युपपादनं मितत्वेऽप्यानीयः। अतएव प्रतियोगिवै
यधिकरण्यविशिष्टसाध्याभावघटितलक्षणस्य व्याप्यभावादेवानानाऽनेकव्याख्यानरथ्यो यस्य निष्ठुत्वानानाधिकरणत्वं
पि द्रव्यत्वसाध्यके सत्ताभाववत्त्वाभावात् साध्ये एवं नानात्वसामान्यनीयाहुर्वानाममनत्यादित्याहो उभयव्यापित्वेऽपि सामान्यद्रव्यत्वपृथिवीत्वान्यतमसाध्यतावच्छेदक
पृथिवीत्वादिपरिशेषे भावाच्यावच्छेदकावच्छेदेनान्वयव्याघातः स्यादित्यत आह। व्यधिकरणद्वयेति। यादृशं च तत्साध्यतानाधिकरणवृत्तित्वं बसा
ध्यापिकरणीभूतं यादृशं चिह्नरूपव्यक्तित्वं वा। यदि व्यधिकरणद्वयवृत्तित्वं नघटोऽह्नि गगनत्वादित्यादौ नाव्याप्तिरत आह। एतेनेति
नन्वेतद्धेतुतारतम्यव्यधिकरणद्वयवृत्तित्वं यादृशं च साध्यासामानाधिकरण्यवृत्तित्वमुच्यते तदोक्तान्यतमसाध्यकपृथिवीत्वान्य

गंदी॰पं॰

नरत्वादिके गुरुत्वे त्वादेरप्यनावच्छेदकमन्ये विधेयसत्तान्यतमोनचैव महिदि दृश्यरीतानं परित्यज्य हेत्वधिकरणयावन्निविष्टाक्यैव तमेव पं साध्य एव
नीनात्वं निवेशनीयं । वस्तुतस्तु यत्किंचित्साध्यानधिकरणहेत्वधिकरणवृत्तिसाध्यवत्ताविरमथ इति न कोऽपि दोषः । एतेन व्याप्यधिकरणद्वयवृ
त्तित्वं च यत्किंचित्साध्यानाधिकरणवृत्तित्वो नतु द्रव्यत्वपृथिवीत्वसमान्यतमसाध्यक पृथिवीत्वादेः संग्रहापत्तिः । परस्परानाधिकरणवृ
त्तित्वं परस्परानधिकरणवृत्तिपरस्परवृत्तित्वं चेन्न द्रव्यत्वपृथिवीत्वान्यतरत्वाद्रव्यत्वादित्यादौ अव्याप्तिसंभवेन तदकथनेऽन्यतमेति
प्रत्यक्षे । अत्र रत्नकोषं । नानाधिकरणसाध्यकेदृशवृत्त्यभावः । न चैवं सत्ताद्रव्यत्वपृथिवीत्वान्यतमवान् द्रव्यत्वादित्यादावव्याप्तिसत्तासंगतिरिति
वाच्यं । तत्तदधिकरणवृत्तित्वविशिष्टसाध्याभावमादाय व्याप्तेः एतेन परस्परव्याप्यव्यापकभावानापन्नत्वं साध्यविशेषणमपि प्रयुक्तं
रूपवान् पृथिवीत्वादित्यादौ स्वल्पापि स्यात् प्रत्यक्षे नानाधिकरणकत्वाभावेऽपि नाधिकरणवृत्तिनावच्छेदकसाध्यमावच्छेदकस्थले द्रव्यपात्रा
व्याप्तिः द्रव्यं पृथिवीत्वादित्यादौ चाविशिष्टाभावादिकमादाय व्याप्तिसंभवान्नावच्छेदकावच्छेदेनान्वयव्याघातः । एतद्दूषणत्ववान्
त्ता एतत्प्रयोजनं चिंत्यं [illegible] नत्वं वा साध्याभावच्छेदकं अत्र विनिगमनाधिकरणनानिवेशो गौरवं एवं विशिष्टसाध्याभावतानानार ॥ २८॥
कत्वेनाव्याप्यवृत्तिव्यभिचारिण्यतिव्याप्तिश्चेत्यत आह प्रतियोगीति । ननु स्वप्रतियोगित्वेन साध्याभावानं [illegible] साध्यानधि

करणत्वं निवेशे तु साध्याभावाधिकरणत्वस्य व्यर्थत्वमिति चेन्न । इदानीं संस्थानुरोधेन साध्याभावाधिकरणतायां निरूपकताभावीयत्वस्यावच्छेदकाव
च्छिन्नसामानाधिकरण्याभावसंबन्धेन प्रतियोगिताविशिष्टान्यत्वस्याभिमतत्वेन तु यद्भावाद्यवारणाय साध्याभावानिवेशात्स्यावश्यकत्वात् । यथा
श्रुते च [illegible] न साध्यानधिकरणत्वस्य स्वरूपमभिधानीयत्वात् श्रुति यद्वा साध्याभाववत्कावच्छिन्नप्रतियोगिताव्च्छेदकावच्छिन्नानधिकरणत्वप्रभावी
धिकरणत्वार्थः । साध्याभावनिष्ठप्रतियोग्यनधिकरणवृत्तितानिरूपकं यथा वृत्तिनिष्ठस्वप्रतियोग्यनधिकरणवृत्तितानिरूपकताभा
वप्रतियोगित्वोक्तावगौरवमेवहेयं । आत्मेति । न च साध्ये साकल्याप्रसिद्धिः । सा नस्यैव साध्यत्वात् ।। न चैवं सर्वस्याविशिष्टायत्तासंबन्धेन
साध्यत्वादर्शः । जन्यसत्ताने स्यैव साध्यत्वात् । एवं च जन्यसत्तानरूपप्रतियोग्यनधिकरणे महाप्रलये कालमात्रान्यतरत्वरूपे हेतोः सत्वेनाति
प्रसंगो नास्तीति महद्भिः । एतेन जन्यसाध्ये संबन्धसामान्येन प्रतियोग्यनधिकरणे गगनादिक्रमेव स्यात् । ननु महाप्रलये । तत्रापि कालि
कसंबन्धेन जन्यसत्तात्वे मन्त्र च हेत्वभाववत्वेनानिव्याप्तिसंगतेमंप्रद व्यर्थमित्यपास्तं ।। अत्संभवदूति । आत्मभिन्नं आत्मा धर्मवा
न्वा मनस्त्वादित्यादौ । विपक्षकालिकत्वैकैकानविषयत्वयोः संसर्गत्वोपगमे साध्याभाववत्यात्मनि तेन संबन्धेन हेत्वभावप्रतियोग्यधिकरण
[illegible]सत्वादव्याप्तिः नयोः संसर्गत्वानुपगमे गुणजन्यावाप्तिः आत्मनः कालिकसंबन्धेन मनस्त्वानधिकरणत्वादित्यव्याप्तिरेवेत्युक्तं । अत्र प्रसिद्धा
नुमानीयसमवायावच्छिन्नवृत्त्यभावादिक्रमादाय संभवः । एवं वह्निमान् धूमादित्यादौ समवायेन हेतोः संयोगावच्छिन्नहेत्वभावमादायातिव्याप्तिः

गं॰ २०

ननु धूमवान्वह्नेरित्यादौ समवायावच्छिन्नहेत्वभावस्य साध्याभाववद्वृत्तित्वमनिष्टत्वाभावान्न । आत्मभिन्नं द्रव्यत्वादित्यादौ साध्याभाववत्त्वात्मनि
कालिकसंबंधावच्छिन्नद्रव्यत्वाभावमादाय व्याप्तिव्याप्तिरतः साध्यताहेतुताघटकसंबंधावच्छिन्नत्वं प्रतियोगितायामन्ये निवेश्यं न तस्य
प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वनिवेशकल्पे आवश्यकत्वेपि गौरवादेतत्कल्पेन प्रदर्शयामास दर्शयतीति दूषणं वेति॥ स्वव्यत्व
साध्यति । गुणत्वं द्रव्यत्वं सत्त्वादिमत्त्वं वा द्रव्यत्वं भेदेन न साध्यसाकल्याप्रसिद्धेः हेत्वधिकरणे वा । गत्वभावानामस किंचित्साध्यप्रतियोगीति । अनेकान्तिके
त्वं स्वसमानाधिकरणयावद्धर्मसमानाधिकरणानेकसाध्यकत्वे साध्याभाववद्वृत्तित्वं निर्धर्मित्वं व्याप्यत्वं धर्मवदवृत्तित्वं स्वरूपसंबंधः
साध्याभाववद्वृत्तेरन्यथाव्यभिचारित्वापत्तिः व्यभिचारिणि आत्मभिन्नं द्रव्यत्वादित्यादौ भेदे हेतुकेति । गुणवान् घटभेदादित्यादौ । स्वाश्रि
तवैशिष्ट्यघटभेदादिरूपहेतुभेदत्वेन गगनाभावत्वेन गगनाभावस्य व्यतिरेकमित्यर्थः यदि हेतुभेदत्वेन गगनाभावस्यैकैकवृत्त्यन्वयित्वं नद
घटभेदरूपहेतोर्गगनाभावरूपहेतोर्भेदसत्त्वेन घटभेदेन घटभेदइति प्रयोगापत्तिरित्यर्थः । हेत्वभावत्वेन हेतुतावच्छेदकावच्छिन्नयादृश
प्रतियोगिताकाभावत्वेन तदीयवृत्तिकोटौ साध्यत्वे व्यापकत्वादिपदप्रयोगस्य स्वसमानाधिकरणेति वदन्नाम न तरस्व वन्हुमुपन्यस्य पक्षे कोविदेति॥ ॥२९॥
अर्थे वमपीत्यादि । वह्न्यभाववत्त्वं नाभावस्येति । वह्न्यभावाव्यत्वविशिष्ट वह्न्यभावाद्यंतत्वाभावस्येत्यर्थः । अन्यथाविवक्षितत्वे यथा तत्त्वं
विशिष्टाभावविशिष्टघटकसंबंधावच्छिन्नप्रतियोगिताकसाव्य । एवं मुत्तमवत्तरतापि एतेनैव पंचलक्षणादीधितिकारो नस्यात्तस्यानेन व

ऽभावभेदमादायैव लक्षणसमन्वयोक्तेः विषयिताद्यनुधावनवैयर्थ्यादित्यपास्तं । पारिभाषिकमेवेत्याह च घटप्रतियोगितावच्छेदकानति
रिक्तवृत्तित्वं न तन्न । द्रव्यं सत्त्वादित्यादौ सत्तात्वस्य विशिष्टसत्ताभावप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वात् तादृशव्याप्तेः । एवमेव हेतुतावच्छेद
कसमानाधिकरणभेदप्रतियोगितानवच्छेदकधर्मावच्छिन्नत्वं परास्तं । नापि तद्वद्वृत्त्यभाववत्संबन्धस्वविशिष्टसामान्यकत्वं । प्रकृतेऽभा
वत्त्वरूप न द्वेष्ट्यात्माभावाप्रसिद्धेः विपक्षानिरूप्याभावप्रतियोगितावच्छेदकसंबन्धेन तद्वृत्त्यभावो नानिवेशनीयत्वानुरोधात् संयोगसंबन्धावच्छिन्न
प्रतियोगिताकस्यान्यस्य वृत्त्यनवच्छिन्नहेत्वभावत्वेन दोषाभावात् तथापि । स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वमेव तद
वच्छेदकत्वं बोध्यं । न चैवं वह्निमान् धूमादित्यादौ संयोगावच्छिन्नहेत्वभावप्रतियोगितावच्छेदकधूमत्वादेः समवायावच्छिन्नधूमाभावप्रतियो
गितावच्छेदकत्वादव्याप्तिः प्रतियोगितायाः संबन्धावच्छिन्नत्वे च हेत्वभावत्वेन दोषाभावस्य सामानाधिकरण्यं । स्वविशिष्टाधिकरणस्य हेतुता
वच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वेनाविशेषणीयत्वादिति दिक् । नन्वेवमपि हेत्वभावे प्रतियोगिवैयधिकरण्यस्य हेतुतावच्छेदकसंब
न्धेनानिवेशाभावे कस्थलेऽव्याप्तिवारणमिति चेन्न । यादृशप्रतियोगिताश्रयधर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वावच्छिन्ना
धर्मावच्छिन्नानधिकरणत्वस्य प्रतियोगिवैयधिकरण्यानवेशात् । न चैवमपि कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः स्वाभाववत्त्वकू
तानिष्ठत्वे संबन्धविशेषावच्छिन्नत्वानिवेशपक्षात् प्रतियोगितायाः पारिभाषिकहेतुतावच्छेदकावच्छिन्नत्वे पारस्परस्य धर्मे हेतुव्यापकता

ग०टी०

वच्छेदकत्वस्यानिवेशः। तेन कम्बुग्रीवादिमत्त्वविशिष्टसत्ताभावमादाय न दोषः। न च तस्यापि तादृक्रियापलयमोरेव कालोपाधिमा पृष्ठे सत्त्वादिति। न च कालि
कसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावभेदविशिष्टवह्न्यभावाभावस्याखंडत्वे ऽपि लाघवेन वह्न्यभावत्वमेव न प्रतियोगितावच्छेदकं स्यादिति
वाच्यं। तत्प्रतियोगितानिरूपकाभावाविरोधिमावच्छेदकत्वस्य तादृशाभावाधिकरणनिरूपितप्रतियोगिताघटकसंबंधावच्छिन्ननिरव
च्छिन्नाधेयतानवच्छेदकत्वरूपस्य प्रतियोगितासमनैयत्यघटकतया विशिष्टसत्तात्वे वृद्धिविशिष्टवह्न्यभावत्वस्य प्रतियोगितावच्छेद
कत्वात्। ननु मतेन वह्न्यभावभेदासत्त्वेनेति पूर्वग्रन्थे वह्न्यभावभेदविशिष्टवह्न्यभावभेदासत्त्वेनेति व्याख्यानं न युज्यते गुरुत्वेनानादराव
ह्न्यभावसत्त्वस्य भेदप्रतियोगितावच्छेदकत्वात्। तस्माद्द्रव्यं सत्त्वादित्यादौ विशिष्टसत्ताभावस्य विरोध्यविरोधाभावरूपतामते सकल
साध्याभाववन्निष्ठाभावप्रतियोगित्वव्याप्तिविरहादनुमानावच्छेदकावच्छिन्नत्वं प्रतियोगिताविशेषणं तोपादेयं। एतदभिप्रायेणैव वह्न्यभावभे
दमस्याभावो ऽधीनेनमस्त्विति [illegible]। [illegible]न॥ न प्रतियोगितानवच्छेदकीभूतवह्न्यभावत्वावच्छिन्ने तिर्यथाविरोधात् तस्माद्धि मा[illegible]
द्रव्यं [illegible]रित्यादौ साध्याभाववत्त्वस्य कल्पने एकमात्राभावमादाय व्याप्तिवारणाय हेत्वभावच्छेदकधर्मावच्छिन्नत्वं मावन्यथा वाच्यं वह्न्यभा
वभेदासत्त्वेनेति ग्रन्थश्च गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वमते वह्न्यभावान्यत्वविशिष्टवह्न्यभावभेदाप्रसिद्धेः पर्यवसितः। एवं च कालि
कसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावभेदविशिष्टवह्न्यभावाभावस्य गुरुत्वेऽपि तादृशाभावत्वस्य प्रतियोगितावच्छेदकत्वं न॥ ३०॥

घटकत्वं । ननु कालिकसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावान्यत्वविशिष्टवह्न्यभावाभावस्य कालिकसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावा-
भावयोः समनियतत्वेनैक्यात् केवलवह्न्यभावत्वस्यैव तत्प्रतियोगितावच्छेदकत्वं न तु विशिष्टवह्न्यभावत्वस्यापि प्रतियोगितायां हेतुमाव-
च्छेदकावच्छिन्नत्वाभावेनाव्याप्तिः स्यादवस्थैवेति चेन्न । तत्र तेन संबंधेन हेत्वभावस्यैव वह्न्यभावीयावच्छेदकतया तेन संबंधेन वह्न्यभावाभावस्य
गुणेन संबंधेन वह्निमद्देशवृत्तित्वेपि अवच्छेदकभेदेनैकत्वयोर्भेदात् । अन्यथा कपिसंयोगाभाववति पिपीलिकासंयोगाभावयोरैक्यापत्तेरिति
एवं विशिष्टाभावस्य विरोध्याभाववद्यपि नाभावाभावात्मकतानतिरिक्तत्वे द्रव्यं विशिष्टसत्तादित्यादावेवाव्याप्तिसंभवात् तदुपेक्षायामिति बीज-
मित्याहुरिति पंक्तिस्थकुंडलिनीया यद्यपि ~~[illegible]~~ समवायान्विशिष्टसत्ताभेदसत्त्वेन तमादाय लक्षणसमन्वयो नास्ति । तथापि भेदाघटितवैशि-
ष्ट्यवत्त्वात् तथा बोध्यम् एतद्दीधितिग्रंथालोकेपि विदापि तादृशसाध्यादेरसमहति तस्यागतेः हेतोः साध्याभाववत्त्वसंपन्नयोर्विशेषणतावि-
शेषेणैतिरूपस्येति । तत्संबंधावच्छिन्नप्रतियोगिताकाभावाभावस्य तत्संबंधरूपद्रव्यादौ नैतदानस्य । सामानाधिकरण्यसंबंधेन वह्न्यभा-
वरूपहेतोः हृदिनेति । हेत्वभावस्य सामानाधिकरण्ये वह्निरूपस्य तत्सामानाधिकरण्यरूपस्य तेनानातिप्रसंगात् । कालिकेति । एवं च
वह्नितरतिरूपध्वंसादौ कालिकसंबंधेन हेतोः सत्त्वेपि तदनधिकरणघटत्वेनाभावावच्छेदकत्वेन तद्भावोपि बोध्यः । ननु साकल्ये सम-
भिव्याहृतपदार्थतावच्छेदकतानिष्ठव्याप्तिनिरूपकत्वं समभिव्याहृतपदार्थान्वयिसकलत्वव्याहृतौ नरवत्विशेषोपसंहारात् । साध्याभा-

गं॰दी॰ पृं॰ वाधिकरणावृत्तिनस्याभावं चार्थं निर्गलितार्थः। तत्र च वह्न्यभाववति कालिकसंबंधेन धूमसत्त्वादव्याप्तिः हेत्वभावप्रतियोगितावच्छेदकमाधारत्वसंबंधेन
हेतुमत्ताघटकसंबंधेन वाच्यमिति निवेशे समवायेन जातेर्हेतुत्वे न प्रसिद्धिः। द्रव्यभिन्नं विशिष्टसत्त्वादित्यादौ हेत्वभावाभावे समवायो नास्त्यद्रव्यत्वविशिष्टं चेत्यत
आह व्यापकत्वेति। एवं चैतेन तु समवायेनात्र निमद्दनित्यवृत्तिसत्ताभावादित्यादौ हेत्वभावस्य च कालिकसंबंधावच्छिन्नाभावस्य प्रतियोगिताव
च्छेदकसंबंधेन प्रतियोगिव्यधिकरणस्य साध्याभाववति हेतुमावच्छेदकीभवति शिरोविशेषणतासंबंधेन सत्त्वादव्याप्तिरतो व्यापकतायां प्रति
योगिवैयधिकरण्यं निवेश्यमिति हेत्वभावे न तादवस्थ्यमिति चेन्न। तथात्वेन हेतुमत्तायां शिविरोधितानियामकसंबंधावच्छिन्नप्रतियोगिताविवक्ष
णात्। अन्यथा हेतुमत्ताग्रहविरोधितानियामकसंबंधेन प्रतियोगिवैयधिकरण्यस्यावश्यकतया गौरवात्। शेषद्वित्यं नैन तदोषस्यानुद्भाव
नीयत्वं उक्तं। केवलान्वयिन्यभावादिति। मूले केवलान्वयित्वं हेतुमावच्छेदकसंबंधेन यत्किंचित्पदार्थाधिकरणे वृत्त्यभावप्रतियोगिसाध्यकत्वं
मभिप्रेतं तत्तेनान्यूनत्वमिति भावः। अत्र केचित् साध्याभावव्यापकतावच्छेदकत्वं हेतुमावच्छेदकसंबंधावच्छिन्नाधेयतावदभावीयप्रतियोगितावच्छे
दकत्वसंबंधेन साध्याभावावच्छिन्नप्रतियोगिताकाभाववत्त्वं उक्तस्थले च सामान्यादौ नादसोरवेरप्रसिद्धावपि द्रव्यत्वादेः प्रसिद्धेन निरुक्त
संबंधेन व्यधिकरणेन समवायाभावावच्छिन्नप्रतियोगिताकाभावस्य अभाववत्त्वे सत्त्वान्नाव्याप्तिरित्याहुः नन्ववास्तावपरंपरायाः प्रतियो
गितावच्छेदकसंबंधत्वेमानाभावात्। परे तु यद्रूपावच्छिन्नप्रतियोगिताकाभाववत्त्वं स्वावच्छिन्नप्रतियोगिताकाभाववद्वृत्ति साध्याभा २४

वाधिकरणत्वाकं न तु १ पदं व्याप्तिरिति निर्वक्तुः ५ सुगमस्यापदेन साध्याभावाधिकरणनिरूपिता या वृत्तिता तदभाववत्त्वावच्छिन्नप्रतियोगिताकाभाववत्त्वमिति अवश्यं वाच्या
तिरिति चेत् तदाहुः स्व तु उक्तरूपावच्छिन्नप्रतियोगिताकाभाववत्त्वावच्छिन्नप्रतियोगिताकाभावाधिकरणवृत्तित्वाभावीयप्रतियोगितावच्छेदकत्वमिति तत्त्व
स्य हेत्वधिकरणवृत्तित्वोपेक्षया गौरवेणानवच्छेदकत्वात् अथाविशेषणानां सम्भवात् । न च हेतुत्वस्यैव लघुत्वात् गौरवेणानवच्छेदकत्वं वेति । तन्निरू
पकतावच्छेदकसम्बन्धावच्छिन्नधर्मावच्छिन्नाधिकरणवृत्तित्वावच्छिन्नप्रतियोगिताकाभाववत्त्वस्य साध्याभावाधिकरणनिष्ठत्वे साध्यव्यापकतावच्छेद
कत्वं । अथवा स्वावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तिताया इति मानाभावात् किं तु स्वावच्छिन्नप्रतियोगिताकाभाववत्त्वस्य साध्याभावाधिक
रणवृत्तित्वं न तु । तेन प्रतियोगितावच्छेदककोटौ चतुष्टयलक्षणविषयाभावानुपगमेऽपि न क्षतिरिति निर्वाच्यं । एतेन धर्मस्य स्वाधिकरणावृत्तिसाध्याभाव
वत्त्वपर्यवसायितया तथैव किं न स्यादिति स्वानुयोगस्य दुर्वारत्वात् । यत्तु साध्याभावसामानाधिकरण्यं हेतुतावच्छेदकस्वरूपान्यतरस
म्बन्धेन वाच्यं । तेन समवायाद्यनेकरित्या हेतौ तद्वृत्तित्वात् । अन्यथा तेन संसर्गत्वानुपगमात् । उपगमेऽपि वा पर्वतादिमान् धूमात् इत्यादौ अव्याप्तिः
तादृशवह्निसम्बन्धेन पर्वते साभावादित्याद्यहेतुतावच्छेदकसम्बन्धस्य स्वरूपसम्बन्धान्यतरात्मकस्वरूपसम्बन्धेन पर्वते साभावः सम्भवत्यभाव
स्य साध्याभाववत्त्वादित्यादिवृत्तित्वाव्यापकत्वानुपपत्तेः विशेषरूपेण संसर्गतानुपगमेऽपि पापिमताकालान्यत्वाविशिष्टे निरूपे साभाववत्ता न कालिक
सम्बन्धेनाकाशाभावादित्यादौ हेतुसाभावाभाववत्त्वस्याकाशाभावात्मत्वेन साध्याभाववत्त्वाभिप्रेते स्वरूपसम्बन्धेन साधारणत्वात् साध्याभाववत्त्वं

ग॰टी॰पं॰ भावच्छेदकप्रतियोगितानिवेशेन कोऽपि दोष इत्यनुबोध्यं । यत्तु प्रतियोगिवैयधिकरण्यविशिष्टसाध्याभाववन्निष्ठ यत्किंचिदिति हेतुमिन्नानवच्छेदकान्यत्व
मेव साध्याभावव्यापकतानवच्छेदकत्वं धूमवान्वह्नेरित्यादावतिव्याप्तिवारणाय यत्किंचिदिति । कपिसंयोगादिसाध्यकसंग्रहाय प्रतियोगिवैयधि
करण्यं इति तत्र स्वरूपसंबंधेनेति । ननु स्वसत्ताभाववान् आत्मत्वाभावादित्यादौ जातिनिष्ठस्वरूपसंबंधेनासत्त्वेन हेतुत्वाभाववत्त्वस्य तादृशत्वादिति भा
वच्छेदकत्वेनाव्याप्तिः । यत्तु वह्निमान् धूमादित्यादौ व्यभिचारिणि वाच्याभाववत्त्वस्य प्रतियोगिवैयधिकरण्यविशिष्टवृत्त्यभावाधिकरणव
यत्किंचिद्धर्मरूपसमवंभवत्य इति तत्तावच्छेदकमपानादन्यत्र इति नानवच्छेदकगगनत्वान्यत्वादिव्याप्तिरिति न स्पष्टधर्मेव । तथापि घटत्वाभावा
धिकरणत्व इति नानवच्छेदकत्वसत्त्वात् महाकालान्यत्वविशिष्ट इति । एतत्साध्ये कालिकसंबंधावच्छिन्नघटत्वाभावस्य व्यभिचारितेन न दोष
लेशोऽपीति । ननु साध्याभाववद्वृत्तित्वादिलक्षणेषु साध्याभाववद्धर्मितावच्छेदकं न संबंधसामान्येन प्रसिद्धमनुमानं एव गगनत्वात् ॥ नापि य
त्किंचित्संबंधेन निर्धूमसमवेतत्वाभावमादाय अतिव्याप्तेः । नापि स्वरूपहेतुतावच्छेदकान्यतरसंबंधेन अन्यतरत्वेन संसर्गतानुपगमात् । न द्वयग
मेऽपि आत्मभिन्नं घटाभावादित्यादौ कालिकसंबंधेन हेतौ साध्याभाववत्त्वस्य स्वरूपसंबंधेन हेतोः सत्त्वादव्याप्तिः । यत्तु नादृश्यतत्त्वाभाववत्त्व
हेतुतावच्छेदकावच्छिन्नाधिकरणतानिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नवृत्तितीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वं विशेषणं ॥३२॥
न तु हेतुत्वेऽपि संबंधनिवेशादिति न कोऽपि दोष इति । तद्धि शेषरूपेण समानं नो भिः भट्टाचार्यैर्दुर्वचनमेव । तस्माद्धेतुतावच्छेदकसंबंधा

न्य हेतुमत्प्रतियोगिकसंबंधान्यसंबंधावच्छिन्नत्वं। तादृशहेतुमत्प्रतियोगिकसंबंधानवच्छिन्नत्वं साध्यतित्वविशेषणं। न चात्र समवायेन ज्ञानेरयोदोमथावि
षयत्वरूपसंबंधावच्छिन्नत्वनिरूपितत्वसत्त्वात् नाव्याप्तिः। अथात्मभिन्नं प्रमेयात्त्वादित्यादौ कालिकसंबंधेन हेतुमत्ता हेतुतावच्छेदकोपः कालिकसंबंधः
मदन्यप्रमेयप्रतियोगिकसंबंधोपस्थितिः कालिकसंबंधस्यैवतिमत्त्वावच्छिन्नसाध्याभावाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकस्य प्रसिध्याऽव्याप्तिः। एवं समवायेन प्र
मेयात्वादित्यादौ समवायेन विषयितया च हेतुमत्त्वापि समवायादेरेव तादृशसंबंधत्वादी। हेतुमत्प्रतियोगिकत्वं घटकं हेतौ हेतुतावच्छेदकसंबंधेन संबंधित्वानि
रूप्यकं उक्तहेतुमत्प्रत्याख्यानुसारात्॥ अथ साध्याभाववद्वृत्तित्वादेर्धर्मावच्छिन्नानुयोगिताकत्वं तद्धर्मावच्छिन्नप्रतियोगिकत्वं हेतुमत्प्रतियोगि
कत्वस्यार्थः इदं निरुक्तसाध्याभाववृत्तित्वसत्तादिरेव न तथाविधो धर्मः धर्मवान् वह्निमान्धूमादित्यादौ धूमवत्प्रमेयवह्निमात्तादेरप्यधर्मत्वापत्तेन
स्पष्टरितिचेन्न। आत्माभावत्ववृत्तित्वावच्छिन्नप्रतियोगिकान्यत्वस्य कथं विरहरूपसंबंधेन सत्त्वेपि अव्याप्त्यनुसरणादिति चेन्न। यथा समवायसंबं
धावच्छिन्नप्रमेयाभावाभावत्वं समवायाभेदोपपत्तौ एवं कालिकसंबंधावच्छिन्नप्रमेयाभावाभावत्वं न चाविषयितया प्रमेयो नथा च हेतुमत्प्रतियोगि
कत्वे हेत्वभावाभाववत्तावच्छिन्नप्रतियोगिकत्वमेवेति न कोपि दोषः। एवमात्माभिन्नं समवायेन द्वित्वोभयसंबंधेन कालवृत्तित्वविशिष्टप्र
मेयात्त्वादित्यादौ हेतुतावच्छेदकसंबंधान्यसंबंधाप्रसिद्धिरप्यपास्ता न चैवमपि उक्तस्थले अव्याप्तिनाद्वैरूप्यमेव धर्मवान् वह्निरित्यादावतिव्याप्ति
वारणार्थं हेतुतावच्छेदकावच्छिन्नानुयोगिताकत्वस्य साध्याभाववद्वृत्तित्वे आवश्यकतया तथाविधसमवायादिसंबंधावच्छिन्नवृत्तित्वाभाव

व्या० पं० सत्तात्वानुयोगिताकसोभावादिति वाच्यं॥ हेतुतावच्छेदकावच्छिन्नानुयोगिताकत्वस्य न स्वावच्छिन्नव्यापकतावच्छेदकावच्छिन्नानुयोगिताक-
त्वस्य प्रत्वात्। अथवा केवलान्वयित्वमन्योन्याभावप्रतियोगितानवच्छेदकहेतुतावच्छेदकत्वाविशेषत्वनाभाववाप्रतियोगिसाध्यकत्वान्यतरवत्त्वमि-
तिई इत्थं च स्थले ऽव्याप्तिमूलकत्वमेवेति। यद्यपि साध्यत्वलक्षणेपि अभावे हेतुतावच्छेदकसंबंधान्य हेतुप्रतियोगिकसंबंधानवच्छिन्नत्वं सा-
ध्याभाववद्वृत्तित्वं निवेशनीयमुक्तं तथापि हेत्वभावे प्रतियोगिवैयधिकरण्यनिवेशानुरोधेनाहारकवति। व्यापकताघटकाभावे प्रतियो-
गिवैयधिकरण्यं चेत्स्वावच्छिन्नाधिकरणत्वमेव साध्याभाववन्निष्ठत्वभावे प्रतियोगित्वं वैयर्थ्यापत्तिः व्याप्तेर्निरूपकः। हेतुता-
वच्छेदकसंबंधेन हेतुमन्निष्ठविरोधितासंबंधेन साध्याभावव्यापकताघटकं यत्समानाधिकरणाभावाधिकरणतात्वेनत्यमेवत्ते मिलकी-
यद्यपि साध्याभाववत्त्वं तथापि अस्य वेत्यादिना युक्त्यर्थानुसरणं परप्रतिपत्त्यर्थमेवेति बोध्यं हेतुतावच्छेदकसंबंधेनैव व्याप्यानुपादाने मत्स्य-
भिन्नं कालिकसंबंधावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावादिव्यादे कालिकसंबंधेन व्यभिचारादित्यव्याप्तिः। कालिकसंबंधस्य स्वरू-
पसंबंधेन हेतुमन्निष्ठविरोधितानियामकत्वं वा ने कालिकसंबंधेन स्वावच्छिन्नाधिकरणत्वस्य व्यभिचारनिरूपकात्तिका। रत्नं भान्ते
त्स्वंहासमानकालीनपदार्थमादाय दोषवारणीयत्वात्। अथवा यमात्मा कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावाभाव ॥३३॥

श्री

द्वित्वादौ स्वरूपसंबंधेन व्यभिचारिणि स्वरूपसंबंधस्यापि यत्किंचित्संबंधेन हेतुमत्ताग्रहविरोधिभावविषयात्मकत्वाभावेन स्वरूपसंबंधेन स्वा
वच्छिन्नानधिकरणत्वं गगनाभावमादाय न संभवतीति गगनानुभाववत्त्वादिकं स्वपदेनोपादाय गगनवृत्तिज्ञानाधिकरणं साध्याभावाधिकरणं
यत्किंचिन्निष्ठत्वमनवस्य हेत्वभावे सत्त्वादतिव्याप्तिरतो हेतुतावच्छेदकसंबंधेन स्वरूपसंबंधेन नोक्तम्। अथवा हेतुमत्ताग्रहविरोधित्वं नाद्याग्रहनिष्ठप्रतिब
ध्यतानिरूपितप्रतिबंधकत्वं तेन स्वत्वसाध्यके व्यभिचारिणि आत्मे हेतुमानयं पर्वत इत्याकारक घटवान् भित्ति समूहालंबनरूपं हेतुमत्ताग्र
हमादाय पर्वतो धूमाभाववानिति प्रतिबंधकीभूत ग्रहविषयीभूत स्वरूपसंबंधेन गगनाभाववत्त्वावच्छिन्नाधिकरणे साध्याभावाधिकर
नि ८ णान्यत्वस्य हेत्वभावे सत्त्वादव्याप्तिः। हेतुमत्ताग्रहत्वावच्छिन्नत्वं निवेश्योक्तवृत्तिरूपपर्याप्तिनिवेशोऽसंभवः। नेदानिवेशो यत्किंचित्संबं
धेन हेतुमत्ताग्रहमादायोक्तदोषः। न स्यादवच्छिन्नत्वं व्यापकस्वरूपत्वं वाच्यं। एवं च निखिलसंबंधेन हेतुमत्ताग्रहत्वव्यापकप्रतिबध्य
तानि हेतुतावच्छेदकसंबंधेनोक्तं। न च तादृशविशेषणविशिष्टधर्मितावच्छेदक हेतुमत्ताग्रहमादाय व्यापकत्वभंगः एवं निवाच्यं। न च स
बंधेन यत्किंचित्स्वधर्माधिकरणधर्मिक हेतुमत्ताग्रहत्वव्यापकत्वस्य निवेशनीयत्वात्। आत्मे घटान्यतराधर्मवान् कालिकसंबंधा
वच्छिन्नात्मत्वाभावसमवायसंबंधावच्छिन्नात्मत्वाभाववत्त्वाद्यादौ विषयत्वात्मनः हेतुमत्ताग्रहविरोधिता निपामकाभावका

ग॰टी॰पं॰ लिकसंबंधेन हेत्वभाववन्नाधिकरणतया व्याप्तिस्वाद्यतो हेतुतावच्छेदकधर्मवैशिष्ट्यं निवेश्यं घटवान् धूमभाववान् पर्वतवान् कालिका
लिकसंबंधेनावच्छेदकधर्मदूतिस्य प्रतिबंधकतया नाद्यः कालिकसंबंधमादाय व्याप्तिरतो हेत्वभाववन्निवेशः ॥ न चैवमपि धूमाभा
ववान् धूमाभावेन न च च धूमाभाववानिति कालिकसंबंधेनावच्छेदकधर्मदूतिस्य प्रतिबंधकत्वान्न हि द्वितीयः कालिकसंबंधमादाया
व्याप्तेरदूषितत्वेनेति वाच्यं तन्निरूपितासांनिध्यस्वावच्छिन्नप्रतिबंधकताया उक्तत्वात् अभाव हेतुकव्यभिचारिण्यतिव्याप्तेः विशेषणतासं
बंधो वक्तव्य इत्येवमेवेति । तथा च स्वप्रतियोग्यनधिकरणेयत्वं तत्वावच्छिन्नाधिकरणं तद्भिन्नं वृत्तित्वमभावाधिकरणं यत्किंचिद्विमलं तत्त्वेन
द्विधा निरासेऽपि स्थितः । नन्वेवमेतद्वृक्षत्ववान् कपिसंयोगाभावात् इत्यादौ संयोगात्मकाभाववति स्वपदेन तद्धरिं स्वप्रतियोगिनः कपिसंयोगाभा
वस्यानधिकरणादसिद्धेः स्वपदेनाभावान्तरमादाय व्याप्तिवृत्तित्वे निर्णय आहनिरस्यामिति । ननु न हि तद्वृक्षत्ववान् कपिसंयोगादित्यादौ
हेत्वभाववत्तावच्छिन्नानधिकरणाप्रसिद्ध्या व्याप्तिरित्येनमाहाधिकरणत्वाभावविषये नानुहेत्वभावाधिकरणत्वाभावो हेतुता
वच्छेदकसंबंधेन स्वावच्छिन्नाधिकरणत्वाभाववत्त्वं निवेश्यं तथा च साध्याभाववति सामान्याधीनेन संबंधेन तद्वत्ताप्रसिद्ध्या ॥३४॥
सत्तावान् जातेरित्यादावव्याप्तिरतोऽन्यथाधिकरणत्वाभावादित्यर्थे इति । यदि वा साध्याभाववद्वृत्तित्वं स्वकत्वेन घटाकाशाद्यावृत्तिजवदिति
हेतुरूपएवाप्रसिद्धत्वात् । तथा च वह्निमान् धूमादित्यादौ वह्न्यभाववतः कालिकसंबंधेन तद्वत्ताद्व्याप्तिरतो

हेत्वभावे इत्यर्थः। एकत्वविपक्षके तु साध्यवत्त्वं न देयमेवेत्यर्थः। ननु साध्याभाववद्वृत्तितायां निरवच्छिन्नत्वे देयेऽनुगगनादेः संयोगाभिन्नत्वं गुणत्वादौ
ऽव्याप्तेः। अत एव साध्याभावे निरवच्छिन्नत्वनिवेशे अवच्छिन्नत्वनिवेशे सत्त्वाद्यपि संयोगसाध्यकाव्याप्तेश्च। तत्राद्ये दूषणं विना द्वितीयसा-
ध्याभाववद्वृत्ति निवेश्य नाशङ्क्येति। द्वितीये तथाविधसाध्याभावाप्रसिद्धेः। अतः साध्याभावे प्रतियोगिवैयधिकरण्यविशेषणं तुल्ययुक्त्या हे-
त्वभावे तु साध्याभाववन्निष्ठत्वे निरवच्छिन्नत्वं विशेषणीयता। न चैवमात्माभिन्नकालिकसंबन्धेन द्रव्यत्वादिसाध्यके कालिकसंबन्धावच्छिन्न-
हेत्वभावमादायातिव्याप्तिर्दुर्वारैवेति वाच्यं। एवमपि प्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वासत्त्वेऽपि एतन्मते तन्मतेनाभिनेयत्वाद्वत्त्व
प्रसिद्धेः। तथा चैतन्मत एव हेत्वभावे गुरुतरप्रतियोगिवैयधिकरण्यविशेषणस्य परित्यागः संगच्छते। एतन्मते द्रव्याभिन्नसंयोगिभि-
न्नादिसाध्यकेऽव्याप्तेः प्रतियोगिवैयधिकरण्यस्यावश्यकत्वात्। अथ वा संयोगिभेदाभाववत् द्रव्यत्वादिरूपत्वोपगमे किं साध्याभाववद्वृत्तितायां हे-
त्वभाववद्वृत्तितायां वा निरवच्छिन्नत्वमुक्तं। तथा सति साध्यादिमत्तावच्छेदकविरोधितानियामकसंबन्धावच्छिन्नत्वस्यापि निवेशनीयतापत्तेः। अ-
स्मन्मतेऽस्वत्वाऽस्वेऽप्रतियोग्यनधिकरणत्वान्वेशेऽपि च वह्न्यादिप्रतियोगिसाध्याभावच्छेदकेति। विषयितायाः प्रतिवृत्तित्वविशिष्टस्य कुण्डे दधार
णाद साध्याभावच्छेदकनिष्ठावच्छेदकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेश्यं। ननु विषयितासंबन्धेन वह्निमद्देशकारणाय प्राप्ति

उचितं।

ग॰टी॰पं॰

योगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वं आवश्यकं। तथा च तेनैव धूमे द्रवारणे न हि द्रव्यत्वे व्यर्थं। न च स्वरूप वा न्य
थिवीत्वादिव्याप्तौ विषयितासंबंधावच्छिन्नद्रव्यत्ववारणाय न हि द्रव्यत्वं प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकत्वेन गुणवान् पृथिवीत्वादि
ति व्याप्तौ विषयितया गुणत्वविशिष्टवह्न्यादेर्दुर्वारत्वेनिवार्यं। साध्यतावच्छेदकव्यापकत्वस्य प्रतियोगितावच्छेदकतायां निवेशनीयत्वादिति
मेवं व्यापकतारीत्या साध्यतावच्छेदकताघटकसंबंधेन साध्यतावच्छेदकत्वस्य स्वरूपतो न व्यापकत्वे व्यापकतावच्छेदकत्वेनैव गौरवादि
ति वह्निघटोभयवह्नेर्वारणाय पर्वत इत्यनुयोगितावच्छेदकावच्छेदेनेति। अनुयोगितावच्छेदकसामानाधिकरण्यपरत्वेनाप्युपमानप्रयोगस्य
त्वे असत्त्वे जलं वह्निर्गं धूमवदिति वा व्यस्य जलभिन्नद्रव्यमित्यर्थनिराकरणात् न सर्वस्यो देशप्रमाणात् न वच्छेदकत्वेनाव्यवच्छेदकारिण्याने अन्यथा
नुयोगितावच्छेदकसामानाधिकरण्येनाभावाद्वेनार्थापि संकेत द्वसंगतेरिति। अनुयोधादिति प्रापापत्तेरिदमनेनानीति। ननु नीलघ
टत्वस्य कथं प्रतियोगितावच्छेदकत्वमिति चेन्न। विशिष्टसत्ताया अनुगतान्यद्रूतिव्यवहारस्य प्रामाण्यात् धर्मावच्छिन्नत्वं प्रतियोगिता नियतधर्मो
वा न प्रतियोगितावच्छिन्नानवच्छेदकः तद्धर्मावच्छिन्नमेव प्रतियोगितावच्छेदकमिति न कोपि दोषः। नीलघटत्वत्वावच्छिन्नत्वं च पीतघटपट
घटीति दीधितिकारैः कृत्सुस्तिरव्याप्तिर्ध्येयं। साध्यवदन्यवृत्तिसमासे साध्यवत्तावच्छिन्नप्रतियोगिताकस्य वन्योऽन्यव्यवृत्तिरिति न दुर्ग
साध्यप्रसक्तिलक्षणं दीधितिकारानामनुविष्टमित्याशंकापरिहाराय साध्यवतोनेति। व्यासद्वसमासस्थले साध्यवत्तावच्छिन्नप्रतियोगि ॥३४॥

नीरूपत्वाभावं कथयन्नुद्दिशति नैयायिकसामान्यार्थौ द्वावपि ते। यत्र द्रव्यत्वं। विशेषणरूपेण संबंधप्रत्यानुपपत्तौ द्रव्यत्वावच्छिन्नत्वविरोधितमप्रतियोगि
तीया संसर्गनियामकाभावात् इति चेत्। यत्र द्रव्ये न घटादिसमारोपे चम्याः प्रतियोगित्वे रूपस्य सदा घट [illegible] निष्ठप्रतियोगितायां निरूपक
मा संबंधावच्छिन्नाभाववोधो वा व्यः। नन्वनिरूपकत्वस्य तत्प्रतियोगितानियामकत्वया नाद्रव्यत्वाभावाप्रसिद्ध्या न संभवतीति निर्वीचमनानुधावनं अनु
योगित्वे वा अथवा रूपसंबंधेनैव ततभेन संबंधस्य च रूपनियामकत्वया नानुपपत्तिरिति भावः। घटेनैत्यादौ प्रतियोगिनां संबंधेनैव घटत्वा
न्नोपगमेऽपि न क्षतिः। घटेनेत्यादेर्व्यवहारस्यैव सत्त्वाद्द्रव्ये घटद्रव्यत्वस्यापि हितं चाक्षुषाद्यसंभवान्मानाभावेन सानुधावनं। कथंचिदिति। अन्य
पदार्थैकदेशान्वये अभेदसंबंधेन साध्यवदनुयोगिताकत्वस्य भाने धर्मिपारतंत्र्येण साध्यवतो पुष्पिता द्रव्यानुयोगिता संबंधेन न भानोपग
मादनुमितौ पक्षे व्याप्तिरपि न तोषः। नीलेत्युक्ते कुत्रापि बुद्धीवादिमत्त्वावच्छिन्नप्रतियोगिताकभेदाभाववति नीले घटे नाहं भेदबोधकत्वा
न्न तावत्स्यादप्रामाण्यं न संभवति। नाद्यभेदादप्रसिद्धेरिति भावः। कंपे बुद्धीवादिमत्त्वावच्छिन्नत्वं प्रतियोगितायां नापिद्यावच्छिन्नत्वावगाहि
नया संसर्गकोऽयं भ्रमस्तोपगमेनतु नुव्याये दोषमाह यद्वेति। यद्वा कंबुग्रीवादिमत्प्रतियोगिकभेदस्यानोपगमे पटः स्यादित्याद्यस्य प्रामा
ण्यनिर्वाहेऽपि नीलो घटः स्यादित्यादिवाक्यस्य प्रामाण्यं न निर्वहतीति कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकभेदस्यानोपगमे नीलो घटः स्यादित्यत्र प्रामाण्यनि
र्वाहेऽपि पटः स्यादित्यादौ प्रामाण्यं न निर्वहतीति बोध्यं। नाद्यभावकेदकत्वसामान्याभावाजिवे दोषकंबुग्रीवादिमत्त्वाविशिष्टघटसंबंधिनि

ग॰टी॰पं॰ त्याभावप्रतियोगितावच्छेदकत्वापक्षधर्मावच्छिन्नविशिष्टसंबंधितसाभावप्रतियोगितावच्छेदकताशालित्वादेः धूमध्याप्रतियोगितावच्छेदकतया सा
मान्याभावाप्रसिद्धिरतः कृतनिवेशः नन्वेवं वह्निर्नवह्निरिति प्रतीतिव्यवहारयोरुपपत्तिः नाद्यो धनत्वावच्छिन्नभेदस्यालाभात्। न चान्यतरत्वेन तद्वच्छिन्न
भेदकूटाभावो घामान्यतरत्वघटितवाच्यो। ईधनं न वह्निरिति प्रयोगानुपपत्तेः। न च पारिभाषिकावच्छेदकत्वं विनावच्छेदकधर्मसामानाधिकरण्य
निवेशान्नदोष इति वाच्यं। कालिकादिसंबंधेन धनत्ववह्नित्वयोः समानाधिकरणत्वात्। संबंधविशेषविवक्षायामपि वह्निर्न वह्निंधनान्यत
रदु इति प्रयोगापत्तिः नाद्यो धनत्वावच्छिन्नभेदस्य संभवादिति। किंच घटेन प्रमेयगगनमिति आदि प्रयोगानुपपत्तिः गगनत्वापेक्षया प्रमेयगग
नत्वस्य गुरुतया भेदवृत्तिच्छिन्नभेदाप्रसिद्धिवारणाय न निरूपितपर्याप्त्याधिकरणावच्छिन्नत्वं प्रतियोगितायामभासमेतत्वं वक्तव्यं तच्च द्रव्यावच्छिन्नत्वस्य
दि स्वनिरूपसंबंधीत्यादिरूपं न तादात्म्येन गगनत्वविशिष्टसंबंधिनोऽप्रसिद्धिरिति चेन्न। अन्वयितावच्छेदकव्यापकधर्मावच्छिन्नत्वस्य
विवक्षणात्। एवं प्रमेयगगनत्वे रूपं यदन्वयितावच्छेदकं तद्व्यापकरूपं यत्प्रमानत्वं तद्वच्छिन्नत्वमेव पर्याप्त्याधिकं तद्वच्छिन्नत्वमित्यदोषः। न
च स्वविशिष्टसंबंधी प्रमेयोऽन्वयितावच्छेदकव्यापकधर्मावच्छिन्नत्वं न तु स्वसंबंधिपदं संपातायातं स्वाश्रयत्वं यदि तु ज्ञानविशेषितं अभा
वपदं वभेदार्थकमिति लिंगक्षाभावात्। नन्वेवं वह्निर्न वह्निरित्यादिप्रयोगापत्तिर्दुर्वारैव वह्नित्वरूपान्वयिभावच्छेदकव्यापकभिन्नो यो वह्निघटयो ॥३६॥
भयत्वरूपो धर्मस्तद्वच्छिन्नभेदस्याबाधितत्वात्। न च व्यापकतायां प्रतियोगिवैय्यधिकरण्यं देयं। तथा च वह्निघटोभयवृत्तिवह्नित्व

समानाधिकरणभेदप्रतियोगितानवच्छेदकत्वेन वह्नित्वाव्यापकमेवेति वाच्यं। वह्निर्घटपटोभयमिति प्रयोगानुपपत्तेः भेदप्रतियोगितावच्छेदकोभय
घटपटोभयत्वस्यान्वयितावच्छेदकीभूत द्वित्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वेन व्यापकत्वासंभवात्। एतेन रूपत्वादिप्रयोगा
ने नुपपत्तिश्च। एवं च व्यापकतायां प्रतियोगिवैयधिकरण्यस्यावश्यकतया वह्निर्वह्निरिति प्रयोगो दुर्वार एवेति [illegible]चेन्न। अन्वयितावच्छेदक
धर्मसमनियतधर्मावच्छिन्नत्वमेव तद्धर्मनिरूपितव्याप्तिप्रयोजकावच्छिन्नत्वं घटत्वद्व्युभयत्वेन च न वह्निसमनियतमित्यदोषः। न चैवमपि केवला
न्वयिनि वह्नित्वसमनियतमाणिमाणेदहनोभयत्वावच्छिन्नभेदमादाय वह्निर्वह्निरिति प्रयोगापत्तिरिति वाच्यं। अन्वयितावच्छेदकसम
नियतधर्मस्यान्वयितावच्छेदकसजातीयत्वेन विवक्षणीयत्वात्। वस्तु[illegible]नस्तिहान्वयितावच्छेदकव्यापकत्वमन्वयितावच्छेदकावच्छिन्नानु
योगिताकभेदप्रतियोगितानवच्छेदकत्वरूपमेव निवेश्यमिति न कश्चिद्दोषः। एतेन हापि नियतत्वपदस्य प्रतियोगिवैयधिकरण्यमनिवे
श्यापि निर्वाहसंभवात्। वह्निघटोभयभेदमादाय वह्निर्वह्निरिति प्रयोगापत्तेः समनैयत्यनिवेशं विनापि वारणसंभवाच्च। एतेन
व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपेण साजात्यनिवेशानेदमौनवद्यमिति प्रत्ययप्रसंगः। अन्वयितावच्छेदकसमनियतत्वेत्यव
च्छेदकस्यतादिति पर्याप्तं। अत्र लक्षणवाक्यान्तःसाध्यवत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावकूटवदवच्छिन्नत्वं संबंधे

गा० ४५: पं० नसाध्यवत्त्वविशिष्टावित्वाया प्रतियोगितानाद्या प्रतियोगिताकभेदवदधिकरणावृत्तित्वनाभेपि भावदर्शनेन व्याप्तिस्वरूपं साध्य
वत्त्वं विहाय साध्याभावावच्छिन्नप्रतियोगिताकभेदं लक्षणे निवेशप्रभावदर्शितस्यैवानुमितौ प्रयोजकत्वादिति प्रायशः यथा नाहानुमितिप्रती
तिः। एवं च लक्षणवाक्यस्य साध्याभावावच्छिन्नप्रतियोगिताकभेदवद्वृत्तित्वरूपार्थे तात्पर्यमित्याह। भावदर्शितेति। साध्याभावावच्छिन्नेत्य
र्थः। ननु साध्याभाववत्प्रतियोगिताकभेदस्यैव लक्षणघटकत्वेपि कुत्र यो वादिमत विशिष्टे घटघटवेष्टापा गुरुधर्मसाध्यं। न च सा
ध्यावच्छिन्नप्रतियोगिताप्रसिद्धेत्यत आह केचिदिति। निरुक्तेति। साध्यविशिष्टस्वसंबन्धितस्याभावप्रतियोगिताविशेषकं च
यमनवच्छिन्नत्वेऽपि साध्यवच्छिन्नभेदकूटवत्त्वासाधारण्ये न प्रतियोगिताकभेदघटितं सर्वं लक्षणं कार्यमित्यर्थः। पारिभाषिकावच्छिन्नत्वं
नानवेशनीयं किन्तु स्वरूपसंबन्धरूपावच्छिन्नत्वमिति। मन्तव्यमस्मादृशां भावहकोति। उभयसाधारणं वेवच्छिन्नत्वमपि वक्तुं न्यायेनाभा
व प्रतियोगितावच्छेदकधर्मवत्त्वसाध्यकत्वं तथा च कम्बुग्रीवादिमत्साध्यकव्याप्तिरापन्नेत्यभिप्रैतीति भावः॥ इति पंचलक्ष ॥३७५॥
णी व्याख्यासमाप्ता॥ श्रीशिवः प्रीयतां